श्रीगणेशायनमः ॥ ॥ अथश्रीगोकर्णमाहात्म्यप्रारंभः ॥ ॐ कुरूणाम
न्वयेजातो राजापरम धार्मिकः ॥ शौनकाद्यैर्मुनिवरैः कृतसंप्रश्नसत्कथः ॥
॥१॥ ऋषिभिः सहितश्चापि शतानीको महामतिः आस्तेकृताभिषेकोथसं
न्यासायकृतक्षणः २ अथाजगाम धर्मात्माव्यासशिष्योमहामतिः तीर्थ
यात्रांपरिचरन्सूतःपौराणिकोर्थवित् ३ उग्रश्रवाः शतानीकमाशीर्भिरभि व
र्धयत् अभिवाद्यमुनीन्सर्वाञ्छौनकादींस्तपोधनान् ४ पप्रच्छकुशलंस
र्वैतपस्स्वाध्यायकर्मसु ततःसराजाधर्मात्मायुधिष्ठिरकुलोद्भवः ५ सूत
माह महाप्राज्ञमास्यतामितिसादरम् आसनंकल्पयामास तदोग्रश्रव
सेनृपः ६ अनुज्ञांप्राप्यसूतस्तु मुनीनां भावितात्मनाम् उपविष्टःसभा
मध्येकृतातिथ्योमहामतिः ७ विश्रांतोभूच्चिरं तस्यांसभायांसूतनंदनः
ततोऽब्रवीदिदंवाक्यंसभायांशौनकोमुनिः ८ शौनकउवाच कुतआ
गम्यतेविद्वन्निदानींसूतनंदन क्वगतोसि भवान्पूर्वंकिमुद्दिश्यप्रयोजन
म् ९ सूतउवाच तीर्थयात्रांगतोब्रह्मन् त्रिःकृत्वापृथिवीमिमाम् भवंतं

द्रष्टुमायानःशतानीकंचपार्थिवम् १० पारिक्षितंचराजर्षिंसंन्यासायकृ
तक्षणं सहस्थित्वाद्विजवरैर्गोकर्णेसुचिरंद्विज ११ इहागतोऽस्मिविप्र
र्षेकिंकरोमिप्रशाधिमाम् शौनकउवाच तीर्थानांदर्शनेपुण्यंस्नानेदाने
चयत्फलम् १२ उपवासेजपेहोमेतीर्थेदेवार्चनेचयत् तीर्थानामपिचो-
त्पत्तिंपुण्यंपुण्यफलंचयत् १३ तत्सर्वंकथयास्माकंपरंकौतूहलंहिनः
इत्युक्तेमुनिनाराजाशतानीकोमहामतिः १४ पप्रच्छेदंसभामध्येसूतंवैरौ
महर्षिणं शतानीकउवाच गोकर्णादागतमितिश्रुतंतेवदतोऽनघ १५
कस्मिन्देशेसगोकर्णस्तीर्थराजःप्रशस्यते किमर्थंवासितंतत्रत्वयावैसूत
नंदन १६ कतिविप्रास्त्वयासार्धंगोकर्णेप्रावसंस्तदा ब्रूह्यशेषेणवैसूत
यस्मात्प्रत्यागतोह्यसि १७ सूतउवाच शृणुत्वंकुरुशार्दूलसहैभिर्मुनि
पुंगवैः व्यासप्रसादाद्वक्ष्यामिसर्वंप्रत्यक्षदर्शिवत् १८ पुराप्रोवाचकैला-
सेषण्मुखायमहेश्वरः गोकर्णक्षेत्रमाहात्म्यंनारदोऽग्निसुतायच १९ अहं १
तद्वर्णयिष्यामिशृणुराजन्महामते सिद्धिक्षेत्राणित्रीण्याहुरहस्यानिस्कंदे

घपि २० शालग्रामंपुष्करंचगोकर्णंचनराधिप शालग्रामेपुष्करेचसु
चिरात्सिद्धिरिष्यते २१ स्वर्गेदेवत्वमपिचधिष्ण्येशत्वमथापिवा गोक
र्णेक्षिप्रमाप्नोतिनिर्वाणंवाशुचिस्मित २२ मनसायद्यदिच्छेततत्तत्क्षि
प्रमवाप्नुते एकार्णवेजगत्यस्मिन्सृष्टिकालउपस्थिते २३ ब्रह्माचतुर्मु
खःपूर्वंसृष्ट्यर्थंतपआस्थितः आविर्बभूवतद्देहाच्छंकरोभक्तवत्सलः
२४ ब्रह्माप्रोवाचतंदृष्ट्वासृष्टिंकुरुमहामते तथेत्युक्त्वातदारुद्रःपाताले
तपसिस्थितः २५ ततस्त्रैलोक्यमखिलंकृतवान्पद्मसंभवः उवाचरुद्रं
प्रकृतिर्निर्वृत्तंचिंतितंतव २६ श्रुत्वातत्प्रकृतेर्वाक्यमुत्थितश्चतयासह
आगत्यदृष्टवान्राजन्मेदिनींचक्रसंस्थितां २७ क्रुद्धःप्रोवाचतांरुद्रोदे
हिपंथानमित्युत भूरुवाच नमेरुजंदेवदेवकर्तुमर्हसिशंकर २८ क
र्णच्छिद्रेणमेदेवहस्वोभूर्वोर्ध्वमुत्पत शंकरउवाच तथाभद्रेकरिष्या-
मियथानोवेत्सिवेदनां २९ अंगुष्ठमात्रवपुषोनिर्गमिष्यामिशोभने इ
त्युक्त्वोत्सत्यकर्णात्तुधरणींप्राहशंकरः ३० गोशब्दःप्रथमंदेवित्वयिसं

परिवर्तते कर्णत्वात्तवकस्यापिगोकर्णमितिगीयते ३१ पातालादूर्ध्व
गमनेममयोनिरभूद्यतः रुद्रयोनीतिनाम्नाचत्रैलोक्येपरिगीयसे ३२
वरुणावर्तनाम्नाचत्रैलोक्येविश्रुतंभवेत् एकार्णवेजगत्यस्मिन्नावर्त
मिवसागरे ३३ विनश्यत्स्वेवविलयेवरुणावर्तकंततः येस्मरिष्यंतिगो
कर्णंप्रातरुत्थायनित्यशः ३४ तेषांरात्रिकृतंपापंतत्क्षणादेवनश्यति
तथादिवाकृतंपापमपराण्हेविनश्यति ३५ गोकर्णतीर्थसंसर्गात्क्षेत्रं
गोकर्णनामकं पंचक्रोशपरीमाणंक्षेत्राणामुत्तमोत्तमं ३६ येचपश्यं-
तिह्यमलंगोकर्णक्षेत्रमुत्तमं जन्मप्रभृतितेषांवैकृतंपापंविनश्यति ३७
स्नानंकुर्वंतियेतत्रगोकर्णेतीर्थसत्तमे तेषांत्रिजन्माचरितंपापंनश्यत्य
संशयः ३८ यथाकैलासशिखरेयथामंदरमूर्धनि निवसामिसदादे
वितथागोकर्णमंडले ३९ श्रीशैलकाश्योरपिरामसेतौगोकर्णमुख्ये-
ष्वपिपुण्यभूमिषु आरभ्यतस्मादपिमुख्यदेशात्सयोजनैर्द्वादशभिश्च
मंडलं ४० इत्युक्त्वाधरणींरुद्रोदृष्ट्वासृष्टिंस्वयंभुवः क्रुद्धःसृष्टिंचसंह



र्तुमैच्छन्नीशानभागगः ४१ प्रमथान्ससृजेतत्रतावद्विष्णुरुपागमत्
उवाचरुद्रंशंभोत्वमपराधंक्षमस्वभो ४२ ब्रह्मणोयत्कृतंत्वंतद्दतेसं
हारकोभव यतःसंहारकरणेत्वमत्रास्थितवानसि ४३ रुद्रभूमिरियं
भूयाद्दहनान्मुक्तिदाभवेत् त्वमत्रतिष्ठभगवन्नेकांतेनमहेश्वर ४४
इत्युक्त्वाभगवान्विष्णुस्तत्रैवांतरधीयत सूतउवाच गोकर्णेसर्वदावा
संमरणंमुक्तिमंडपे४५ रुद्रभूम्यांतुदहनंकांक्षंतेविबुधाअपि ततो
रुद्रश्चिंतयित्वाभविष्यत्कार्यगौरवं ४६ स्वप्रतिज्ञावृथामाभूदितिब्र
ह्मादिषुस्वयम् स्थावरांतेषुयत्सत्वंतद्गृह्यभगवांछिवः ४७ तेनसत्वे
नदेवेशोनिर्ममेमृगमुत्तमं चतुष्पादंत्रिनेत्रंचत्रिशृंगंचारुदर्शनं ४८
शृंगत्रयंमृगस्यास्यब्रह्मविष्णुशिवात्मकं तन्मृगेणाह्यगात्स्वामीसहकै
लासमास्थितः ४९ ततःप्रजाःप्रजापालाःसर्वेवैसत्ववर्जिताः सुरा
सुरमनुष्याश्चब्रह्माणंशरणंययुः ५० ततःस्वयंभुवासार्धंसुराविष्णु
मुपागमन् क्षीरोदशय्याशयनंफणींद्रेणसमन्वितम् ५१ प्रणम्यविष्णु

सहिताइदमूचुःस्कराश्करा: स्कराश्कर मनुष्याणां भेदमिच्छामिभूधर ५२
उवाचविष्णुस्तच्छ्रुत्वासत्वंरुद्रेणवैहृतं तंगत्वाविबुधश्रेष्ठागृह्णीध्वंसत्व
मात्मनां ५३ तच्छ्रुत्वावचनंविष्णोःकैलासमगमन्स्कराः पूजयित्वाम
हादेवंभक्त्यर्क्षीचक्रिरेस्कराः ५४ तेषांतुष्टोमहादेवोभक्त्याचविनयेनच
मृगंददौमहादेवःसर्वसत्वमयंतदा ५५ तदादेवास्कराःसर्वेजगृहुःसत्व
मात्मनां शृंगत्रयंहृतंराजन्ब्रह्मविष्णुमहेश्वरैः ५६ तच्छृंगंपूजयामा
सरुद्रोभक्त्यानुकंपया तच्छृंगंलब्धुकामःसन्रावणोराक्षसाधिपः ५७
कैलासपर्वतंगत्वातपउग्रंसमाचरत् गोकर्णान्नारदोराजन्ययौकैलास
पर्वतं ५८ तपस्यंतंराक्षसेंद्रंदृष्ट्वैवत्रिदिवंययौ देवराजमुवाचेदंरावण
स्यविचेष्टितं ५९ कैलासशिखरेतत्रतपस्यतिचरावणे मृगशृंगंनेतुका
मोलिंगंयुष्माभिरर्चितं ६० लिंगेनीतेरावणेनस्कराःस्युर्निर्धनाध्रुवं त
स्माद्विघ्नंकुरुविभोइत्युक्त्वाचययौदिवं ६१ गतेतुनारदेशक्रोबृहस्पति-
समन्वितः काश्यपोलिंगवृत्तांतंज्ञात्वासर्वस्करैःसह ६२ विघ्नंकर्तुरावण

ययौकैलासपर्वतं एतस्मिन्नंतरेपूर्वंरावणोराक्षसाधिपः ६३ तोषयि
त्वामहेशानंलिंगंलब्ध्वंमहेश्वरात् पंचब्रह्मात्मकंक्वापिनिधेयंभुवीतिच ६४
शंभुनोक्तस्ततोदैत्यःस्वपुरींपादचारवान् यास्यामीतिमतिंकृत्वासययौदक्षि
णांदिशं ६५ तच्छ्रुत्वाविबुधाःसर्वेमार्गयंतोनिशाचरं नदृष्ट्वारावणंक्वापि
सम्लानमुखपंकजाः ६६ एतस्मिन्नंतरेकालेनारदस्तत्रचागतः उवाचरावणो
दृष्टस्ससकोटीश्वरेमया ६७ तदुपायंप्रवक्ष्यामिस्थापयेत्तत्सुविघ्नवित् लिं
गरत्नंतथाकार्यमित्युक्त्वानारदोययौ ६८ तच्छ्रुत्वाविबुधाःसर्वेविष्णुंसंप्र
र्थ्यभक्तितः गोकर्णमगमन्सर्वेलिंगस्यस्थापनायहि ६९ ततोविष्णुर्गणप
तिंसमाहूयेदमब्रवीत् गजास्यत्वंमहाभागयाहिरावणसन्निधिं ७० तत्करे
मृगशृंगाख्यंलिंगंतिष्ठतिशांभवं सदत्वातवहस्तेतत्संध्योपास्तिंकरिष्यति
७१ तस्माद्गृहीत्वातल्लिंगंभुविस्थापनमाचर इत्युक्तोविष्णुनासोपिययौ
रावणसन्निधिं ७२ ततोविष्णुःस्वचक्रेणछादयामासभास्करं तंदृष्ट्वारा
वणोमोहाद्गजाननमुवाचह ७३ मुनिपुत्रइदंलिंगंगृहाणत्वंमुहूर्तकं सं

ध्योपास्तिंचरिष्यामि पुनर्गृह्णामिहस्ततः ७४ इत्युक्त्वागणनाथस्यलिंगंदत्वा
करेस्वयं संध्योपास्तिंततः कर्तुंगतोदैत्योमहाबलः ७५ ततोगणपतिस्तू
र्णंत्रिःसमाहूयरावणं स्थापयामासतल्लिंगंभुविश्लेष्मातकेवने ७६ चैत्र
स्तेंऽतरेराजन्त्रयोविंशतिमेशुभे त्रेतायुगेत्वीश्वराब्दे शरत्कालेशुभोद
ये ७७ ऊर्जशुक्लप्रतिपदिव्यतीपातेरवेर्दिने तुलामासेमीनलग्नेधिशा
खायांप्रतिष्ठितं ७८ ततोहरिःस्वकंचक्रमुपसंहृतवान्रवेः ततोदेवगणे
लिंगेपुष्पवृष्टिंचवर्षति ७९ वीणावेणुमृदंगाद्यैर्ननृतुश्चाप्सरोगणाः ८०
इतिश्रीस्कांदे गोकर्णखंडे गोकर्णमाहात्म्ये प्रथमोऽध्यायः ॥ १ ॥ छ
॥ सूतउवाच ॥ ततोददर्शचाकाशेभास्करंदीप्ततेजसं भूम्यांप्रतिष्ठितंलिं
गंगजास्येनदशाननः १ कोपेनलज्जयाविष्टोज्ञात्वावचनमात्मनः संध्या
र्घ्यादिविहायैवततोलिंगांतिकंययौ २ दोर्भ्यांलिंगंप्रगृह्याशुचकर्षबलतः
खलः नशशाकोद्धर्तुमेनमादितःपतितोभुवि ३ पतितंमूर्च्छितंदृष्ट्वाश
ब्दःकलकलोह्यभूत् तत्रदेवैश्चऋषिभिःस्थापितंलिंगमुत्तमं ४ कलकले

श्वरंनाम त्रिषुलोकेषुविश्रुतम् तस्यदर्शनमात्रेणब्रह्महत्यादिनश्य
ति ५ तस्यलिंगस्यसविधेह्युदीच्यांदिशिसंस्थितम् वैवाहिकोनाम
गिरिःसर्वसिद्धनिषेवितः ६ तस्यदर्शनमात्रेणत्रिवर्गंलभतेनरः त
त्रगत्वानरोराजन्दक्षिणाशांविलोकयन् ७ प्रदक्षिणीकृत्यगिरिंस्थि
त्वातस्यतलेशुभे अष्टाक्षरंजपेन्मंत्रंऋषि छंदस्सदैवतम् ८ उच्चैः
शब्दंप्रकुर्वीतहरिरित्यथवाहरः तच्छ्रुत्वाकाशगंगावैह्यभिषिंचतिसा
श्रवम् ९ कृतत्रेतद्वापरेषुविपरीतंकलौयुगे एवंकरोतिचेद्राजन्नमृ
तंचसगच्छति १० लब्धसंज्ञोमुहूर्ताद्वैलज्जयावनताननः तस्माद्विनि
र्गतोभूत्वाशतशृंगस्यमूर्धनि ११ गुहांप्रविश्यचांभोधिंतीर्त्वास्वपुरमा
ययौ गजाननोपिलिंगस्य आग्नेय्यांदिशिपृष्ठतः १२ पश्चिमाभिमु-
खोभूत्वाचत्वारिंशत्सदेनृप बहुरूपीगणाध्यक्षःस्थितवान्सिद्धिदाय
कः १३ पूजांकृत्वाप्रथमतोविघ्नेशस्यनरोत्तमः ततोमहाबलस्यैवपू
जनंयःसमाचरेत् १४ वांछितार्थंसलभतेसयात्राफलमश्नुते —

सूतउवाच कैलासस्थोमहादेवोलिंगवृत्तांतमादितः १५ सर्ववायुमुखान्धृ
त्वागोकर्णक्षेत्रमागमत् सर्वान्देवान्समाहूयइदंवचनमब्रवीत् १६
त्रिदशारावणोलोकेराक्षसोबलवत्तरः सर्वलोकंस्वयंजिग्येबलेनैव
स्वकायतः १७ तंजित्वास्वबलेनादौलिंगरत्नमतिष्ठत तस्मान्महाबल
इतित्रैलोक्येविश्रुतंभवेत् १८ कार्तिकेपुण्यमासेतुलिंगरत्नंप्रतिष्ठितम्
तस्मादहंकार्तिकेतुपार्वत्यासहपार्षदैः १९ चराचरेणजगताविशेषेण
वसाम्यहम् भवंतोऽत्रैवतिष्ठंतुआज्ञयाममवैस्फुराः २० अस्मिन्मासेनरो
यस्तुअत्रागत्यसमाहितः प्रातःस्नात्वाकोटितीर्थेलिंगरत्नंप्रपूजयेत्
२१ ददातिकिंचित्सनरःकर्मबंधाद्विमुच्यते यद्दत्तंयद्धुतंजप्तंकृतंकर्मसु
रोत्तमाः २२ तदनंतफलंचास्तुनराणांमत्प्रसादतः तस्माद्गोकर्णयात्रा
यांविधुयुक्कार्तिकोवरः २३ माघमास्यसितेपक्षेयाभवेच्चचतुर्दशी त-
स्यांनिशीथसमयेलिंगरत्नंमहाबलं २४ एकेनबिल्वपत्रेणअणुमात्रजले
नवा द्रोणपुष्पेणगंधेनयःपूजतिनरोत्तमः २५ तस्यपुण्यफलंवक्तुंब्र



ह्मणापिनशक्यते गोकर्णेबिल्वपत्रंचलिंगरत्नमहाबलः २६ शिवरात्रि
स्तथादेवादुर्लभंहिचतुष्टयम् तस्मिन्कालेतुयद्दत्तमेकंकोटिभविष्यति
२७ इत्युक्त्वात्रिदशान्शंभुःसर्वदेवगणैःसह पूजयित्वागणपतिंमहा
बलमपूजयत् २८ ततोरुद्रःप्रसन्नात्मापार्वत्यासहपार्षदैः कैलासम
गमद्राजन्देवान्ऋषिगणैःसह २९ महाबलमितिप्राहुर्लिंगंत्रिभुवने
श्वरं तदाप्रभृतिगोकर्णेवासंचक्रुर्दिवौकसः ३० विष्णुनास्वीयशृंगंतु
शालिग्रामेप्रतिष्ठितम् ब्रह्मणास्वस्यशृंगंतुपुष्करेस्थापितंह्यभूत् ३१
क्षिप्रंसिद्धिकरंराजन्गोकर्णेनात्रसंशयः शालग्रामेपुष्करेचरुचिरा-
त्सिद्धिरिष्यते ३२ तस्मात्तेषुप्रधानोभूद्गोकर्णेकुरुपुंगव देवंमहाबलं
राजन्पूजयंतिसुरासुराः ३३ तस्मात्पुण्यतमंलिंगमन्यन्नास्तिजगत्त्रये
महाबलसमंलिंगंनभूतंनभविष्यति ३४ कृतेमहाबलःश्वेतस्त्रेतायां
मतिलोहितः द्वापरेपीतवर्णश्चकलौश्यामोभविष्यति ३५ आक्रांतस
प्तपाताल कुहरोऽयंमहाबलः घोरेकलियुगेप्राप्तेमृदुतामुपयास्यति

३६ दृष्ट्वावादिव्यलिंगंचश्रुत्वावासागरध्वनिं कोटितीर्थेनरः स्नात्वा
पुनर्जन्मनविद्यते ३७ पंचक्रोशपरीमाणंगोकर्णक्षेत्रमंडलम् सर्वाण्य-
श्यानिलिंगानितीर्थान्यंभांसिसर्वशः ३८ सार्धयोजनविस्तीर्णमर्धयो
जनमायतम् क्षेत्ररूपेणतिष्ठंतंशिवंपश्यंतिसूरयः ३९ नाग्निनानशशां
केननतारागृहनायकैः तमोविशीर्यतेसम्यग्यथासवितृदर्शनात् ४०
अपिपापशतंकृत्वाब्रह्महत्यादिमानवः सकृत्प्रविश्यगोकर्णेनरोमुच्येत
पातकैः ४१ अत्रैकेनदिनेनापियत्कृतंकर्मचोत्तमम् तदन्यत्राब्दलक्षेणत
पोभवतिसंभृतम् ४२ यत्रेंद्रब्रह्मविष्ण्वादिदेवानांप्रीतिकाम्यया महाब
लाभिधानेनशिवः सन्निहितः स्वयम् ४३ इंद्रोब्रह्मामुकुंदश्चविश्वेदेवामरु
द्गणाः आदित्यावसवोरुद्राश्शशांकश्चसतारकः ४४ एतेविमानगतयः स
हिताः पार्षदैः स्वकैः पूर्वद्वारिनिषेवंतेदेवदेवंमहाबलम् ४५ कालोमृत्यु
र्यमः साक्षाच्चित्रगुप्तश्चपालकः पितृभिःसहरुद्रैश्चदक्षिणद्वारमाश्रिताः
४६ विभावसुश्चित्ररथश्चित्रसेनोमहाबलः सहगंधर्ववर्गेणगायंतिपरमे



श्वरम् ४७ रंभाकृतस्थलामेनाउर्वशीचतिलोत्तमा नृत्यंतिपुरतःशंभो
रुर्वश्याद्याःसुरस्त्रियः ४८ वसिष्ठःकश्यपःकण्वोविश्वामित्रोमहातपाः जै
मिनिश्चभरद्वाजोजाबालिःक्रतुरंगिराः ४९ गौतमोजमदग्निश्चभार्गवोऽत्रिः
पराशरः व्यासःसत्यवतीपुत्रःशुकेनसहकौरव ५० एतेचान्येचराजेंद्रस
र्वेब्रह्मर्षयोऽमलाः देवंमहाबलंभक्त्याउत्तरंद्वारमाश्रिताः ५१ नारदोवा
लखिल्याश्चमरीच्याद्याःप्रजेश्वराः सनकाद्यामहात्मानउपरिष्टादुपास
ते ५२ तथान्येमुनयोऽसंख्याजटिलावल्कलांबराः दंडिनोव्रतिनोमुंडाः
स्नातकाब्रह्मचारिणः ५३ सेवंतेपरयाभक्त्यादेवदेवंमहाबलं एवंदे
वाःसगंधर्वाःपितरःसिद्धचारणाः ५४ विद्याधराःकिंपुरुषाःकिंनरागु
ह्यकाःखगाः नगाःपिशाचावेतालादैतेयाश्चमहाबलाः ५५ नानाविभ
वसंपन्नानानावाहनभूषणाः महाबलस्यनिकटमागत्यभरतर्षभ ५६
प्रस्तुवंतिप्रगायंतिपठंतिप्रणमंतिच लभंतेभीप्सितान्कामान्रमंतेचय
थासुखं ५७ अत्रस्थानानिसर्वेषांदेवानांसंतिपार्थिव विष्णोश्चदेवदेव

स्यब्रह्मणःपरमेष्ठिनः ५८ कार्तिकेयस्यदुर्गायागजवक्रस्यचानघ ध
र्मस्यक्षेत्रपालस्यऋषीणांचमहात्मनां ५९ अन्यानिशिवलिंगानिविद्यंते
कोटिकोटिशः गोकर्णकोटितीर्थंचतीर्थानांमुख्यतांगतं ६० सर्वेषांशिव
लिंगानांसार्वभौमोमहाबलः येमातृपितृहंतारोयेवाभूतद्रुहःशठाः ६१
गोघ्नाश्चैवकृतघ्नाश्चपरदाररताश्चये तेसर्वेप्राप्यगोकर्णंस्नात्वातीर्थ
जलेषुवै ६२ देवंमहाबलंपूज्यप्रयांतिशिवमंदिरं तत्रपुण्यासुतिथि
षुपुण्यर्क्षेपुण्यवासरे ६३ येऽर्चयंतिमहालिंगंतेरुद्राःस्युर्नसंशयः र-
वींदुसोमवारेषुयदादर्शोभविष्यति ६४ तदाजलनिधौस्नानंदानंचपि
तृतर्पणं शिवपूजाजपोहोमोब्रह्मचर्यंद्विजार्चनं ६५ यत्किंचिद्वाकृतंक
र्मतदनंतफलप्रदम् व्यतीपातादियोगेषुरविसंक्रमणेषुच ६६ महाप्र-
दोषवेलासुशिवपूजाविमुक्तिदा स्त्रियोबालाश्चवृद्धाश्चचतुराश्रमवा
सिनः ६७ देवंमहाबलंदृष्ट्वालेभिरेकृतकृत्यताम् गोकर्णतीर्थलिंगानां ७
संख्याधात्रापुराकृता ६८ कोटयोऽत्रत्रयस्त्रिंशत्तीर्थलिंगानिभागशः

सर्वलिंगमयंक्षेत्रंबिससंतानवत्ततम् ६९ कर्मक्षयोहिभवतिबुद्धिस्त
त्क्षेत्रसेवने सर्वेषामपिदेवानांगोकर्णसममुच्यते ७० पृथक्पृथक्च
देवानांक्षेत्राण्यन्यानिकौरव सिद्धद्वाराणिचत्वारितानिमेशृणुपार्थिव
७१ पुराणंमानवोधर्मःक्षेत्रमाचार्यमेवच क्षेत्राणामुत्तमंपुण्यंगोकर्ण
मभिधीयते ७२ अत्रोपवासंविधिवद्येकुर्वंतिनृपोत्तम तेसर्वेपापनिर्मु-
क्ताःस्वर्गेक्रीडंतिदेववत् ७३ युगंपश्चिममासाद्यनात्रदृश्यंतिदेवताः
ऋषयश्चमहात्मानोह्यदृश्याश्चंचलात्मभिः ७४ बिलेविशालेकेचित्तुविय
तिस्थानमेत्यच सर्वभूतैरदृश्यास्तुकेचित्तत्रैवसंस्थिताः ७५ अधस्ताच्छ
तशृंगाद्रेर्विशालंबिलमुत्तमम् भोगार्थंदेवराजस्यनिर्मितंविश्वकर्मणा ७६
इंद्रःसर्वसुरैःसार्धमागत्यविषुसंक्रमे गोकर्णस्थेषुतीर्थेषुस्नात्वामासंवसे
द्बिले ७७ स्नात्वोर्जपौर्णमास्यांतुपुनर्गच्छेद्यथासुखं तुलागतेयदासूर्ये
ससुरासुरमानवाः ७८ स्नातुमायांतिगोकर्णंस्नात्वायांतिकृतार्थताम् वै
शाखेपौर्णमास्यांवास्नानंतत्रप्रशस्यते ७९ देवैरधिष्ठितंपूर्वंभास्करक्षेत्र

मुच्यते पर्वताग्रेनदीतीरेब्रह्मविष्णुशिवैःश्रितम् ८० दुर्गादिबाहुलेया
द्यैस्तद्भास्करमितीर्यते काशीपुष्पगिरिःकांचीनिवृत्ताख्याह्यलंपुरी ८१
श्रीशैलःश्रीविरूपाक्षःसेतुःकेदारएवच गोकर्णंचदशैतानिभास्कराण्या
कुरूत्तमाः ८२ गोकर्णयात्राभिरतोनारीवापुरुषोपिवा ब्राह्मणःक्षत्रियोवै
श्यःशूद्रोवांत्यजएववा ८३ यदाप्राप्नोतिगोकर्णंयोवाकोवापिमानवः
मुंडनंचोपवासंचश्राद्धंकुर्वीतभक्तितः ८४ नकुर्याद्यदिमूढात्मापितृहं
ताभवेत्कवम् चौलेचयज्ञदीक्षायांप्रायश्चित्तव्रतेषुच ८५ महागुरुस्वा
मिमृतौभास्करेचोपनायने जीवत्पित्तापिकुर्वीतवपनंश्राद्धमेवच ८६ सं
वत्सरेद्विमासेनेपुनःक्षेत्रंविशेद्यदि क्षौरोपोषणकादीनिकुर्यादेवनसंश
यः ८७ गोकर्णंशतशृंगंचताम्रगौरीचनिम्नगा तीर्थराजःसमुद्रश्चपु-
ण्यमेतद्धिपंचकम् ८८ इतिश्रीस्कांदेगोकर्णखंडेगोकर्णमाहात्म्येद्विती
योऽध्यायः २ ॥ ॥ ॥ ॥ ॥ ॥
तीर्थानांकोटिरत्रैवएकासंभवतिद्विज भयात्पतगराजस्यएकीभूतंपुरा ८

तनं १ तदेतद्दृश्यतेराजञ्छतशृंगस्यचोत्तरे कोटितीर्थमितिख्यातंती
र्थकोटिद्रवंमुने २ तस्मिन्स्नातःसर्वतीर्थैस्नातोभवतिमानवः ३ दशाश्व
मेधावभृतेनसाम्यंवदंत्यास्ताःकोटितीर्थद्विजाग्र्याः महत्पुण्यंपुण्यकृतां
वरिष्ठंस्नातास्तस्मिन्नाकपृष्ठंव्रजंति ४ शतानीकउवाच कोटितीर्थस्यमा
हात्म्यंविस्तराद्वक्तुमर्हसि शतशृंगंगिरिवरंगरुडःकथमानयत् ५ कुत्र
स्थितोगिरिर्ब्रह्मन्किमुद्दिश्यप्रयोजनम् सूतउवाच शृणुराजन्प्रवक्ष्या
मिशतशृंगस्यचागमम् ६ शतशृंगमितिख्यातंहिमवच्छिखरंमहत् प
श्चिमेनतुकैलासशृंगंशिवनिकेतनम् ७ इंद्रनीलंतुपूर्वस्यांविष्णुस्थानं-
गिरेःशिरः तयोर्मध्येब्रह्मवासश्शतशृंगोमहागिरिः ८ पंचकोट्यैर्वृतो
वृक्षैःसर्वर्तुकुसुमान्वितैः देवगंधर्वसिद्धाद्यैःपुण्यतीर्थसमन्वितः ९
तस्योपरिष्टाद्गरुडोदुर्मुखंनागनायकम् आदायखेचरंस्तस्मात्पतितोनाग
राड्गिरौ १० दुर्मुखंपतितंदृष्ट्वाक्रोधात्पर्वतमागमत् तमागतंसमालो-
क्यदुर्मुखोऽधोविवेशह ११ क्रोधाभिभूतःखगराट्सार्धयोजनमुच्छ्रितं

उत्पाट्यपर्वतंतंतुजगामाकाशमार्गतः १२ सब्रह्मणामुनिवराःसहस्राणां
चतुर्दश संतिहिकोटितीर्थानितैःसर्वैःसहितोगिरिः १३ ततोबुबोधभग
वान् ब्रह्मातत्कर्मगारुडम् त्रैलोक्यभारंगरुडेदधानेपर्वतंन्यधात् १४ तस्मि
न्कालेसगरुडोगोकर्णोपरिसंस्थितः रुरोदभृशभारार्तोददर्शोऽधोमहा
मुनिं १५ तपोवनेतपस्यंतमगस्त्यंप्राहविह्वलः भारेणपीडितंमांत्वंत्रा
हिक्षिप्रंतपोधन १६ अगस्त्यस्तद्वचःश्रुत्वामाभैषीरितितंचाब्रवीत् म
ज्यमानंसगरुडंशिखरंवीक्ष्यसुव्रतः १७ अवतारयामासगिरिंवामह
स्तेनलीलया कृपयागरुडाद्राजन्मोचयामासकाश्यपिं १८ निधायांभो
निधौशृंगंगरुडंविज्वरंव्यधात् स्वयंतपश्चरन्नास्तेतपोवनगतोमुनिः १९
गरुडंमोचितंदृष्ट्वाब्रह्माप्रोवाचहृष्टधीः तुष्टोऽस्मितेपक्षिराजशंभोर्मन
सिसंस्थितम् २० कृतवानसिभद्रंतेवरंदास्यामितेखग गरुडउवाच
त्रैलोक्यभारंभगवन्वोढुंशक्तिर्भवेन्मम २१ नमत्तोह्यधिकोलोकेभवित
व्यःपराक्रमे ब्रह्मोवाच अधिकोभवसर्वेभ्यस्त्रिलोकीवाहनक्षम २२

इतितस्मैवरंदत्वाब्रह्मादेवर्षिभिःसह कमंडलुंनिदायात्रसर्वतीर्थमयंगि
रौ २३ सूतउवाच गरुडोपिनृपश्रेष्ठवरंप्राप्यपितामहात् स्वनाम्नाती
र्थमुत्पाद्यस्वमूर्तिंस्थाप्यतत्रतु २४ अगस्त्यमभिवाद्याथयतोविष्णुस्ततो
गतः तदेतद्भुविविख्यातमाश्रमंगारुडंनृप २५ तीर्थंपक्षिपतेस्तत्रगारुडं
नामविश्रुतम् क्षिप्रंसिद्धिकरंतद्वैआयुर्वर्धनमुत्तमम् २६ स्नात्वागरुडगा
यत्रीचतुर्लक्षंजपेन्नरः महासिद्धिर्भवेत्तस्यअणिमादिर्नसंशयः २७
अगस्त्योपिमहातेजाःस्वनाम्नातीर्थमुत्तमम् विधायलिंगंसंस्थाप्यवर
देश्वरनामकम् २८ बहुकालंतपःकृत्वासिद्धिंप्राप्यमहेश्वरात् यथाका
मंसगोकर्णेस्थितवान्मुनिसत्तमः २९ सूतउवाच तपोवनंपुण्यतमंदे
वानांविश्रुतंमहत् आब्रह्मतीर्थाद्राजेंद्रगंगाधारांतमिष्यते ३० शतशृं
गस्यभद्रंतेतटंपूर्वोत्तरंनृप तपोवनंपुण्यतमंदेवगंधर्वसेवितम् ३१ ती
र्थानांकोटिरत्रैवचैकस्याभवतिद्विज कोटितीर्थमितिख्यातंसर्वपापप्रणा
शनम् ३२ सूतउवाच गिरेःशृंगवतस्तस्यतटेदक्षिणपश्चिमे अपरंको

टितीर्थंतुभयात्सागरमाविशत् ३३ ध्यातोरुद्रेणमनसाशतशृंगागमोनृ
प रुद्राज्ञयासारभूतंसर्वंतत्रागतंह्यभूत् ३४ तस्मात्कोकर्णसदृशंना-
स्तिनास्तिजगत्त्रये कोटितीर्थस्यमाहात्म्यंवक्ष्यामिशृणुकौरव ३५ अपि
पापशतंकृत्वाब्रह्महत्यादिमानवः कोटितीर्थस्नानमात्रान्नरोमुच्येतपा
तकैः ३६ अत्रैवोदाहरंतीममितिहासंपुरातनम् अवंतिविषयेराजाविष्णु
वर्मेतिचाभवत् ३७ पुराकृतयुगेसोपिस्वराज्यंप्रतिपालयन् ब्रह्महत्या
दिपापानिबहूनिकृतवानसौ ३८ दासीरजस्वलाधाम्यकामयामासदुर्म-
तिः तेनचाकृतपापानिनसंतिधरणीतले ३९ अतीवपापसंदोहाद्राजय
क्ष्माभवत्ततः नभिषक्नचवाबंधुस्त्रातातकोपिनविद्यते ४० नमित्रंनचवा
राज्यंनशक्तास्तन्निवारितुं तस्मिन्नेवंविधेराज्ञिदैवयोगात्तदागतः ४१ स
नकोनामयोगींद्रस्तद्गृहंप्रविवेशह नृपभार्यापुण्यशीलानत्वायोगिनमाग
तम् ४२ उवाचश्लक्ष्णयावाचापाहिमांपतिदानतः नसागतमभिप्रेत्यवि-
ष्णुवर्मामहामतिः ४३ पूजयामासविधिवदुवाचवचनंतदा कृतार्थोस्मि



महाभागभवद्दर्शनमात्रतः ४४ अनाथंपापकर्माणंविमुखंपुण्यकर्मणि दु
राचाररतंकामलोलुपंपाहिमांमुने ४५ जन्मांतरार्जितात्पुण्याद्भवतोदर्शनं
ह्यभूत् इत्युक्तश्चिंतयामासयोगीध्यानसमाहितः ४६ उवाचराजन्वक्ष्या-
मितवकर्मपुरातनम् यत्रवृंदावनंनास्तिशालग्रामादिपूजनम् ४७ वेदशा
स्त्रादिवादोवानिष्ठुरंवचनंक्रुधा स्वाचारस्यपरित्यागोमलिनांबरधारणम्
४८ परधर्मपरिग्राहः स्नानसंध्यादिवर्जनम् यत्रदानक्रियानास्तितत्रस्युः
सकलारुजः ४९ पूर्वजन्मनिवापापमिहजन्मनिवाकृतम् पीड्यतेव्याधिरू
पेणपूर्वजन्मनित्वंनृप ५० जातश्शूद्रात्तुवेश्यायांधर्मध्वजइतिश्रुतः लुब्ध
कःप्राणिहननोदेवब्रह्मस्वहारकः ५१ देशाद्देशमनुप्राप्तश्चौर्यबुद्धिरतःस
दा सरस्तीरमनुप्राप्तःकदाचिद्द्विजवल्लभा ५२ भर्त्रासहैवशनैर्गंगास्ना
नार्थमागता तांविलोक्यसहत्वंतुस्नातोगंगाजलेऽमले ५३ स्नानदानादि
सर्वंतुदृष्टवानसिपार्थिव ततोविप्रगृहंयातेतद्गृहंगतवानसि ५४ बिलंकृत्वा
धरात्रौतुकुड्येत्वंगतवान्नृप निद्रालुंद्विजपत्नींत्वंस्पृष्टवान्करमूलतः ५५

बुध्वातुसावरारोहाचोरोऽयमितिचाब्रवीत् ततोनिर्गमवेलायांपुरचाराः
समाययुः ५६ बध्वात्वांराजसदनंनीत्वाराज्ञेन्यवेदयन् राजाकरपदंछित्वा
पुरान्निर्वापयद्बहिः ५७ असहन्वेदनांसोपिमृतःपर्वतमूर्धनि तेनपापेनमह
ताजाताबुद्धिस्त्वेदृशी ५८ प्रातःस्नानान्माघमासेपार्थिवत्वमवाप्तवान्
दर्शनंममवैजातंस्नानदाननिदर्शनात् ५९ पापंनिरयभोगायपुण्यंस्वर्गाय
पार्थिव त्वंहिपापविशुद्धःसन् येनत्वंनीरुजोभवेः६० तदहंसंप्रवक्ष्यामि
नचदानंतपोनच पश्चिमांबुधितीरस्थेगोकर्णेक्षेत्रसत्तमे ६१ कोटितीर्थ
मितिख्यातंविद्यतेविमलंसरः स्नानमात्रेणतत्तीर्थेमहापातककोटयः ६२
नश्यंत्येवनसंदेहोनात्रकार्याविचारणा दिनमेकंकोटितीर्थेप्रातःस्नात्वान
रोत्तमः ६३ महाबलंपूजयित्वाब्रह्महत्यादिनश्यति पुरातुविघसोनाम
ब्राह्मणोमध्यदेशजः ६४ ब्रह्महत्यादिपापानिकृतवान्बहुशोनृप भ्रांतो 
बभ्रामजगतींभृगुवाक्यात्ततोद्विजः ६५ गोकर्णक्षेत्रमासाद्यमाघमासि
द्विजोत्तमः प्रातःस्नात्वाकोटितीर्थेपूजयित्वामहाबलम् ६६ सर्वपापविनि

र्मुक्तोदेहांतेमुक्तिमाप्तवान् राजन्स्तोतवपापस्ययदानिष्कृतिमिच्छसि ६७
गोकर्णक्षेत्रमासाद्यमाघमासेऽरुणोदये कोटितीर्थेविधानेनसमभ्यर्च्य
महाबलम् ६८ ब्राह्मणेभ्योधनंदत्वासदाकृस्त्वमवाप्स्यसि स्वस्थःस्वरा
ज्यमासाद्यप्रजाःपालयपूर्ववत् ६९ भुक्त्वाभोगान्बहुविधानंतेस्वर्लोकमे
ष्यसि इत्युक्त्वासनकोयोगीयथाकामंजगामह ७० ततःसराजागोकर्णं
सामात्यःसपुरोहितः चतुरंगबलोपेतोमाघादौसमपद्यत ७१ प्रातःस्ना
त्वाकोटितीर्थेपूजयित्वामहाबलम् दत्वादानानिबहुशःकिंचित्कालंनृपोत्तम
७२ स्थित्वातत्रस्थतीर्थेषुनिमज्यच्चयथाक्रमम् स्वस्थःस्वराज्यमासाद्यभु
क्त्वाभोगान्यथेप्सितान् ७३ पुत्रपौत्रैःपरिवृतःकृत्वायज्ञादिकाःक्रियाः
अंतेविमानमारुह्यपत्न्यासहदिवंययौ ७४ इतिश्रीस्कांदेगोकर्णखं
डेगोकर्णमाहात्म्येतृतीयोऽध्यायः ३ ७ ७ ७
सूतउवाच शतशृंगस्यद्वौभागौसमुद्रेपतितौनृप दुर्गाशृंगमितिख्यातं
गोकर्णस्योत्तरेऽपतत् १ नागशृंगमितिख्यातमपतद्दक्षिणांदिशं यस्

तिपंचतीर्थानिनागशृंगेमहांतिच २ रुद्रकुंडंनागतीर्थंवसोर्धारमतःपरम्
शंखतीर्थंसिद्धकुंडंतीर्थान्येनातिसत्तम ३ तीर्थेषुतेषुयःस्नातिसोऽनंतफ
लमश्नुते दशतीर्थानिकौरव्यगौरीशृंगेवसंतिच ४ शतानांचैवतीर्थानां
मुख्यानिकुरुपुंगव गंगाधारंवसोर्धारंमाहिषंनागतीर्थकम् ५ गौरीह्रदं
चकौमारंकालीह्रदमतःपरम् मुंडोद्भवंवारुणाख्यंदशतीर्थानिकौरव ६
मुख्यानितानिराजेंद्रसहस्राणांमहांतिच तेषुस्नात्वानरोभक्त्यानवम्यां-
भक्तिसंयुतः ७ सर्वपापविनिर्मुक्तोरुद्रलोकेमहीयते सूतउवाच ब्रह्मा
जगत्पतिःपूर्वंसिद्धिकामःप्रजापतिः ८ निर्मलेनैवमनसाध्यानस्थोभून्नृपोत्त
म बद्धपद्मासनोदेवःसंयम्यात्माजितेंद्रियः ९ पद्मासनस्थितस्याथध्या
यतःपरमेष्ठिनः उत्तानेदक्षिणेपाणौबभूववरवर्णिनी १० तांदृष्ट्वाभगवान्ब्र
ह्माप्रीतिमानभवत्तदा तामाहरुद्रकांतात्वंभविष्यसिवरानने ११ इत्युक्ते
ब्रह्मणासातुचकमेरुद्रमेवतु दृष्ट्वाचांभसिमग्नंसाध्यानदृष्ट्यामहानदी
१२ गोकर्णेचास्यचाधारंखात्पपातगिरौतदा तांददर्शमहादेवोगंगांत्रि



पथगांशिवाम् १३ गोशृंगपर्वतेराजन्दिव्यरूपांमहानदीम् तस्यारूपंसमी
क्ष्यैवभगवानीश्वरोपिसन् १४ तस्यांप्रविष्टभावस्तुप्रसन्नस्तामुवाचह
कासिभद्रेकुतश्चासिकस्यासिदयिताशुभे १५ किमर्थंचेहकल्याणिगिरौ
चरसिभामिनि गंगोवाच ममत्वंदेवदेवेशवृत्तांतंज्ञातुमर्हसि १६ ध्याने
नधामाधिपतेसर्वभूतात्मकोह्यसि इत्युक्तःसतयादेवोदध्यौचांतर्मनश्चि
रम् १७ ज्ञातांकमंडलोःकस्यज्ञात्वोवाचमहेश्वरः महेश्वरउवाच विदितं
तवकल्याणिसर्वमागमनंमया १८ मदर्थंमंदगमनेएहिमत्प्रियमाचर इत्यु
क्त्वादेवदेवस्तांगंगांत्रिपथगांपुनः १९ पस्पर्शपाणिनादेवस्तस्यागात्रंसुशो
भनम् तस्यतन्मतमाज्ञायब्रह्मालोकपितामहः २० आजगामाथतंदेशं
गोकर्णेसुरपूजितम् महतातपसादेवत्वदर्थेनिर्मितामया २१ तस्माद्गृहा
णपाणिंत्वमस्याःकमलकोमलम् इत्युक्त्वाभगवान्ब्रह्मादत्वागंगांपिनाकि
ने २२ अभेदंचतयोरुक्त्वाजगामत्रिदिवंपुनः ततःप्रभृत्यसौविप्रगिरि
र्वैवाहिकोऽभवत् २३ गौरीतिनामतस्यास्तुनाम्नाख्यातुगिरौच्युता च

तस्थचारतस्मिन्साताम्रगौरीतितांविदुः २४ ततःसाताम्रगौरीतुद्विधाभू
ताभवत्तदा नदीरूपेणसादेवीसर्वपापप्रणोदिनी २५ निर्गम्यताम्रतल
तोबहुतीर्थसमन्विता गत्वासादक्षिणामाशांक्रोशार्धंसास्रूपावनी २६
निवृत्यचोत्तरंकिंचिद्रुद्रयोनिंजगामह रुद्रयोन्याभितोगत्वापितृस्थालींस
मासदत् २७ सर्वतीर्थानिसंगम्यसमुद्रंप्रविवेशह पृथिव्यांयानितीर्थानि
पातालनिलयानिच २८ अंतरिक्षगतान्येवताम्रगौर्यांनसंशयः तस्मात्ती
र्थवरासातुनदीनामुत्तमानदी २९ पिंडंतिलोदकंवापिस्नात्वाचात्रकरोति
यः पितरस्तस्यसंतुष्टा नरकस्थाअपिद्विज ३० तृप्ताःस्वर्गंगमिष्यंतिपौ-
र्णमास्यांविशेषतः पशुपक्षिमृगाश्चापितज्जलस्पर्शमात्रतः ३१ सर्वपाप
विनिर्मुक्तास्तेऽपियांतिकृतार्थताम् सूतउवाच दिव्यरूपेणसादेवीदिव्यस्त्री
रूपधारिणी ३२ ताम्रगौरीनदीतीरेरुद्रेणसहसंस्थिता तोषयंतीशिवंसाक्षा
द्गौरीप्राङ्मुखतस्सदा ३३ दिव्यरूपधरांदेवींयेऽर्चयंतिनराभुवि तेषाम- 
भीप्सितंदेवीददात्येवनसंशयः ३४ सूतउवाच अनेकमाश्चर्यमिदंशृणु

जातंनरोत्तम सवीरोवानरःकश्चिद्वृक्षाग्रेषुचतत्रवै ३५ पर्यटन्फललोभेन
प्रमादात्पतितोद्रुमात् संज्ञामवाप्यशनकैःस्वयमाश्वस्ययत्नतः ३६ तस्मा
दुत्थायसशिलातलाद्वृक्षमुथोरुहत् शाखांतरेणविष्वकुसंस्तत्रस्वांगव्रणा
तुरः ३७ असहन्वेदनाराजंस्तत्रप्राणैर्वियोजितः ततःकतिपयाहस्सुगतेषु
नृपसत्तम ३८ शिरोभागोऽपतत्तस्यताम्रगौर्याजलेऽमले शेषांगंसंस्थितं
वृक्षशाखायामेवसुव्रत ३९ प्रक्षालितंचोत्तमांगंतस्यकेवलमंभसि तेन
पुण्येनमहतावानरःसन्नृपोत्तम ४० कस्मिंश्चिदुत्तरेदेशेचित्ररूपाख्यभूप
तेः क्षेत्रेजातःकुमारोऽभूच्चित्रबाहुरितिश्रुतः ४१ मुखमात्रस्यमनस्य
कमनीयंनराकृति शेषंसर्वांगमपिचवानराकारमद्भुतम् ४२ दिनेषुगच्छ
त्सुततःकुमारःसव्यवर्धत चित्ररूपःसराजर्षिश्चिंतयामासचाकुलः ४३
अपृच्छद्ब्राह्मणान्सर्वान्नशेकुस्तेसमीरितुम् एतस्मिन्नंतरेकालेकश्चित्सि
द्धवरःपुमान् ४४ यदृच्छयाचरन्भूमौतत्पुरंसमपद्यत ज्ञात्वातत्कारणंवि
द्वानब्रवीत्तंद्विजोत्तमः ४५ शृणुराजन्मनस्तापंत्यजतत्कारणंब्रुवे सिद्ध

उवाच अवतीर्णापुण्यनदीसार्धंरुद्रेणसंस्थिता ४६ गोकर्णेताम्रगौरीति
सर्वपापापनोदिनी तस्यारोधोद्भवेवृक्षेमृतःकश्चित्कपिर्ज्वरात् ४७ चिरा
च्च्युतंतस्यशिरोनिमग्नंतत्रचांभसि शेषांगंवृक्षएवास्तितस्माद्देहविरूपता
४८ महत्पुण्यफलंप्राप्यजातःक्षेत्रेतवौरसः पुत्रोऽभून्मुखमेवास्यनराकृ
तिर्महीपते ४९ ताम्रगौरीतीरभववृक्षस्थंवानरांगकम् विकृष्यविक्षिपत्वा
शुताम्रगौर्याःशुभांभसि ५० ततस्तेमनसोभीष्टंसिध्येदत्रनसंशयः इ
तिसंचोदितस्तेनराजापरमधार्मिकः ५१ संप्रेषयित्वास्वामात्यान्पातयामास
तज्जले वृक्षाग्रस्थंकपेरंगंक्षिप्तमात्रेशरीरके ५२ नृदेहीसकुमारोऽभूद्राज
लक्ष्मीनिकेतनः ताम्रगौरीजलस्पर्शमात्रेणैवद्विजोत्तमः ५३ वानरोपिन
रेंद्रोभूल्लेभेचह्यतुलांश्रियम् ततःसिद्धवरःसोपियथाकामंजगामह ५४
सूतउवाच अस्थिनिक्षेपणंयत्रताम्रगौर्यानदीजले कुर्युस्तेमनुजालोके
सर्वपापविवर्जिताः ५५ यावदस्थिकणास्तिष्ठेत्ताम्रगौर्यानदीजले तावत्स्व १४
र्गान्नच्यवंतेदिव्यभोगोपभोगिनः ५६ भूलोकेप्राप्यसाम्राज्यंपश्चान्मु-
क्तिंव्रजंतिवै अत्रार्थेकथयिष्यामिइतिहासंपुरातनम् ५७ उन्मूचिर्नामरा
जासीत्पुराप्राचेतसांतरे ससर्वराज्यमकरोत्प्रजानांद्रोहकृद्बलः ५८ तस्य
पापेनमहताप्रजाह्यासन्नुपद्रुताः चमसोनामतस्यासीत्सुतःपरमधर्मवि
त् ५९ पितर्युपरतेसोपिकिंचिल्लोकसमन्वितः ससंस्कारंपितुःकुर्वन्वन-
मागात्ससर्त्विजः ६० ततोंऽतरिक्षेसुश्राववपितॄणांभारतींनृप पित्रातवम
हाभागनृशंसेनदुरात्मना ६१ प्राप्ताःस्मनरकंसर्वेपुनरावृत्तिवर्जितम् त
स्मादस्मद्धितार्थायपितुर्गृह्यकलेवरम् ६२ याहिगोकर्णमध्येचसभृत्यःस
पुरोहितः तत्रगत्वातुसंस्कारंपितुःकुरुविधानतः ६३ अस्थिनिक्षेपणंतत्र
ताम्रगौर्यांकुरुप्रभो तच्छ्रुत्वाचमसस्तूर्णंपितॄणांवचनंनृपः ६४ तस्यास्थि
संचयंचक्रेताम्रगौर्यांनृपोत्तमः तत्प्रभावात्क्षयंजग्मुःपापानिसुबहून्यपि
६५ स्वर्गंप्राप्तःक्षणादेवउन्मूचिःपितृभिःसह यावदस्थीनिजंतूनांताम्र
गौर्यांवसंतिहि ६६ तावत्स्वर्गान्नच्यवंतेनात्रकार्याविचारणा ६७ इति
श्रीस्कांदेगोकर्णखंडेगोकर्णमाहात्म्येचतुर्थोऽध्यायः ४ छ छ

सूतउवाच संगमेताम्रगौर्यास्तुसमुद्रस्यचसत्तम विधूतपापस्थाली ५
नितद्वंतिमीषणः १ तस्याधस्ताद्भवांमातावर्ततेसामृतस्रवा ब्रह्मणोम
नसातात जातापूर्वमनिंदिता २ जातमात्रा तदोवाचस्थानंमेसंप्रदीयताम्
ब्रह्मोवाच अयिपुत्रिमहादेवः पाताले तपसिस्थितः ३ तंप्रार्थयसिचेत्स्था
नंविधास्यतिवरानने इत्युक्त्वासातदादेवीपातालंसुरभिर्ययौ ४ तस्याः
क्षीरादभूत्क्षीर वारिधिस्तस्मादभूत्सुधा दिव्यलिंगंततोजातमगृण्हन्देवता
स्तदा ५ साहिसर्वात्मिकाधेनुर्ददर्शपरमेश्वरम् तांदृष्ट्वाशंकरोधेनुमुवाच
सुरपूजिताम् ६ किमिच्छसिवरारोहे तद्ददाम्यवलंबितम् सातंप्रणम्यचोवा
चत्वागताहंतवांतिकम् ७ स्थानंमेनास्तिभगवन्स्थानंमेसंप्रकल्पय शंक
रउवाच अस्योपरिमहाभागेगोकर्णंचास्तिभूतले ८ क्षेत्रंतत्रैवगंतव्यं
वसेदिष्टमनिंदिते सातथेतिप्रतिज्ञायगोकर्णंसमुपागमत् ९ संगमेताम्र
गौर्यास्तुसमुद्रस्यचसत्तम पितृस्थाल्यांमहाभागस्थित्वासमचरत्तपः १० १५
देवतास्तुस्थितंलिंगममृतादुत्थितंशुभम् समादायप्रतिष्ठाप्यपूजयामा

सभक्तितः ११ घोरेणतपसातस्यास्तुतोषभगवान्हरिः तंदृष्ट्वापुंडरीकाक्षंव
वंदेसुरभिर्नृप १२ तामुवाचजगन्नाथः किमिच्छसिशुभेवद सुरभिरु
वाच वरंददासिचेन्मह्यंवरार्हायदिवाप्यहम् १३ स्वदेहोत्थस्यपयसोदे
वर्षिपितृयोग्यताम् तल्लिंगपूजनंचैववव्रेसामहतींश्रियम् १४ श्रीभग
वानुवाच तस्यास्तुसिद्धिर्भवतुमत्प्रसादाद्वरानने स्थानमेतन्महाभागे
त्रैलोक्यतिलकंभवेत् १५ पश्चादिदंमहाभागेपितृस्थालीभविष्यति अ
त्रदत्तंहुतंवापिजप्तंवासुरनंदिनि १६ अक्षय्यंतद्भवेद्भद्रे मत्प्रसादान्नसं-
शयः इत्युक्त्वाभगवान्देवस्तत्रैवांतरधीयत १७ सुरभिस्तत्रसिद्धिंसाप्रा
प्यावासयथासुखम् गोबिलंनामतत्रैवसमुद्रेवरुणालये १८ बिलात्तस्मा
द्विनिष्क्रम्य आगच्छतिदिवानिशम् क्षीरादिभिस्स्वात्मभवैः प्लावयिष्यति
सर्वतः १९ मध्यंदिनेदिवासातु अर्धरात्रिषुरात्रिषु मध्यंदिनंचविषुवत्तु—
लाचैवार्धरात्रिकम् २० तदहोरात्रमभवन्नृणांसंवत्सरंनृप तस्मिन्कालेनृ
पश्रेष्ठपितृस्थाल्यांसमाहितः २१ देवान्पितॄन्समुद्दिश्यब्राह्मणेभ्यः प्रय

च्छति सुवर्णरौप्यमथवा वस्त्रं रत्नमयाविकम् २२ तत्फलं नहि मे शक्ति
र्वक्तुं संख्यातुमेव वा यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठंति तारकाः २३ तावत्स्व
र्गे महाभाग क्रीडंत्यप्सरसां गणैः सर्वपापविनिर्मुक्ता विष्णुलोकं व्रजंति ते
२४ धूतपापा भविष्यंति पापिष्ठास्तत्र गा नृप विधूतपापस्थालीति सा बभू
व ततो नृप २५ धेनोः श्वासानिलस्पर्शात् एनांस्यपहतानि वै दूरं गच्छंति रा-
जेंद्र प्रवाते शुष्कपर्णवत् २६ सूत उवाच पितृस्थालीति यन्नाम शृणुष्व
नृपसत्तम ब्रह्मा जगत्पतिः पूर्वं संध्यारूपी बभूव ह २७ तेन रूपेण स पितॄन्
सृष्टवानब्जसंभवः सा संध्या सह पुत्रैस्तु तत्र तेपे महत्तपः २८ संध्यालिंगं
सा विधूतपापस्थालीश्वराभिधम् संस्थाप्य पूजयामास अर्घ्यमादिभिरन्वि
ता २९ तस्यास्तपःप्रभावेन तुतोष परमेश्वरः सिद्धिर्भवतु ते भद्रे त्वत्सुता
नां सुदुर्लभा ३० स्थानमेतन्महाभागे सर्वपापहरं भवेत् पितृस्थालीति
भद्रं ते अद्यप्रभृति शोभने ३१ पितॄणां परमं क्षेत्रं मत्प्रसादाद्भविष्यति अत्र १६
दत्तं हुतं चापि पितॄनुद्दिश्य शोभने ३२ अमृतं नाम तद्देवि स्थापयिष्यंति वै

स्थिरम् माघकृष्णचतुर्दश्याममायां वा विशेषतः ३३ पिंडं तिलोदकं वात्र
यः प्रणम्य प्रयच्छति तस्यैव पितरः सर्वे तृप्ता निर्वाणमाप्नुयुः ३४ येऽपि पिशा
चत्वमायांति लोके स्वकृतकर्मणा तेषामपि विधानेन श्राद्धं यः कुरुते सुतः
३५ तेन पुण्येन महता पितरः सपितामहाः पिशाचत्वविमुक्तास्तु तृप्तिं ग
च्छंति शाश्वतीम् ३६ इति दत्वा वरं शंभुस्तत्रैवादर्शनं गतः सूत उवाच पि
तरः पितृलोकस्था वदंत्याशापरायणाः ३७ अस्माकमन्वये कश्चित्सुदारव
लुगमिष्यति पितृस्थालीं च योऽस्माकं गयायां वा पिंडदो भवेत् ३८ तेनास्मता
रिताः सर्वे तृप्तिं यास्याम शाश्वतीम् तेषां पितॄणां राजेंद्र य आशां पूरयेदिह
३९ स यास्यति परं स्थानं पुनरावृत्तिवर्जितम् संध्याकाले तु यः संध्यां तत्र
गत्वा करोति च ४० तस्यैकवर्षं राजन्वै संध्यालोपो भवेद्यदि तं सा पूरयते नि
त्यं पितृस्थाली न संशयः ४१ एकं वा भोजयेद्विप्रं तत्रस्थो यः समंत्रकम् ते
नान्नेन नृपश्रेष्ठ पितरः सपितामहाः ४२ तृप्तिं यास्यंति ते सर्वे यावन्मन्वंत
रं दिवि तत्रस्थो रुद्रगायत्रीं यो जपेद्विधिपूर्वकम् ४३ चतुर्विंशतिसाहस्रं

तूष्णींदीक्षासमन्वितः जन्मप्रभृतियत्पापंज्ञानतोऽज्ञानतःकृतम् ४४ तन्न-
श्यतिनसंदेहःप्राप्नुयात्परमंपदम् यस्तुमासंवसेत्पापीसहचैवतनूजया ४५
ससंवत्सरजप्तेनमंत्रेणानेनशुध्यति यःसकृत्संगतोवेश्यांकामतोऽकाम
तोपिवा ४६ सतत्ररुद्रगायत्रींजपन्मासेनशुध्यति ब्रह्महागुरुतल्पीवा
सुरापीपरदारगः ४७ तस्मिन्रुद्रस्यगायत्रींजप्त्वासिद्धिमवाप्नुयात् या
वंतश्चतिलामर्त्यैर्गृहीताःपितृकर्मणि ४८ तावद्वर्षसहस्राणिपितरःस्वर्ग
वासिनः देवाश्चपितरोयस्मात्पितृस्थाल्यांवसंतिहि ४९ आवाहनंविसर्गं
चतेषांतत्रततोनहि पितृस्थालींसमासाद्ययःपितॄनुद्धरिष्यति ५० सकुली
नःसचोदारःसबुधःसचबुद्धिमान् सश्रेष्ठःसर्वभूतानांमानेऽद्भुदत्रसंशयः
५१ अत्रार्थेकथयिष्येहमितिहासंपुरातनम् चंद्रिकानगरेपूर्वमास्तेवैश्यो
महागुणी ५२ धर्मगुप्तइतिख्यातोधनवानमितप्रभुः पुत्रदारसमायुक्तोन
धर्मंकृतवानसौ ५३ पित्रोर्मृतदिनेचैववैधृत्यादिदिनेषुच अर्धोदयादियो
गेषुमन्वादिषुयुगादिषु ५४ नदत्तंकांचनंकिंचिद्रूप्यंधान्यादिकंतुवा द्रव्य-



लोभेनमहतानव्ययंकृतवानसौ ५५ देशेभ्योऽतिथयोगत्वानिराशाभोजने
च्छया शपंतितंदिवारात्रंपिशाचोऽयंभवेदिति ५६ एवंबहुतिथेकालेगृहं
दग्धंहुताशनात् व्याधितःपुत्रदाराद्याःसर्वेपंचत्वमागताः ५७ कुष्ठव्याधि
युतःसोपिधनंनष्टमभून्ततः ततोगृहाद्विनिष्क्रम्यसवैश्योपिवनंगतः ५८
वृक्षमूलमुपाश्रित्यक्षुत्तृषापरिपीडितः अस्तंगतेदिनकरेतत्रोवासस्तुदुःखि
तः ५९ तत्रदृष्ट्वामहाव्याघ्रोभक्षयामासतंनृप तेनदोषेणमहतापिशाच
त्वमवाप्तवान् ६० सद्योऽरण्येमहाघोरेविजनेह्यवसन्नृप तत्रस्थितान्भूत
संघान्भक्षयामासनित्यशः ६१ एवंकालेषुगच्छत्सुकदाचिद्द्विजपुंगव तीर्थया
त्राप्रसंगेनकुत्सस्तत्रागतोह्यभूत् ६२ तंदृष्ट्वाधर्मगुप्तस्तुकुत्संब्राह्मणपुंगव
म् मुदापरमयायुक्तोविप्रांतिकमुपागमत् ६३ दोर्भ्यांगृहीतेविप्रेतुपापहा
निरभून्ततः जातिस्मृतिरभूत्तस्यविप्रंतत्याजदूरतः ६४ तंप्रणम्यस्तुवाचोच्चै
स्त्राहित्राहीतिभक्तितः मामुद्धरमहाभागदयांकुरुममोपरि ६५ इतिश्रुत्वा
पिशाचोक्तंतमाहद्विजपुंगवः कस्त्वंभवान्घोररूपीकिमर्थंचेहतिष्ठसि ६६

भवताकिंकृतंपूर्वमीदृशींयोनिमागतः पिशाचउवाच इतिपृष्टस्सविप्रेण
सवृत्तांतंन्यवेदयत् ६७ त्वदंगस्पर्शमात्रेणजाताजातिस्मृतिर्मम मामुद्धर
दयालोत्वंत्वामहंशरणंगतः ६८ कुत्सउवाच माभैषीर्धर्मगुप्तत्वामुद्धरिष्या
म्यहंध्रुवम् याहिसार्धंमयावैश्यगोकर्णक्षेत्रमुत्तमम् ६९ श्राद्धंकृत्वाविधा
नेनपितृस्थाल्यांतवानघ पिशाचत्वाद्विमोक्षिष्यइत्युक्त्वातेनसंस्तुतः ७०
गोकर्णक्षेत्रमासाद्यपितृस्थाल्यांविधानतः स्नानंकृत्वातुतन्नाम्नाश्राद्धंकृ
त्वाविधानतः ७१ उद्धारयामासचतंपिशाचत्वाद्द्विजोत्तमः यथाकामंगतः
कुत्सोवैश्यःस्वर्गपुरंययौ ७२ इतिश्रीस्कांदेगोकर्णखंडेगोकर्णमाहात्म्ये
पंचमोऽध्यायः ५ ❀ ❀ ❀ ❀ ❀
सूतउवाच भृगोःख्यात्यांसमुत्पन्नोमृकंडुर्नामवैमुनिः सुमित्रानामत
स्यासीद्भार्यापरमशोभना १ तयोर्जज्ञेसुतोराजन्मार्कंडेयइतिश्रुतः त
दासंतोषवेलायांवागुवाचाशरीरिणी २ मृकंडोतवपुत्रोऽयंषोडशाब्देमरि १८
ष्यति इतिश्रुत्वातदावाक्यंदुःखितौतौबभूवतुः ३ दुःखेनचक्रतुस्तस्य

जातकर्मादिकाःक्रियाः बालोगुरुगृहेनीतःपित्रातेनमहात्मना ४ गुरोःप्र
सादाद्वेदानांपारगःसंबभूवह स्वगृहंपुनरायातोववंदेपितरौस्वकौ ५ दृष्ट्वा
ननंदतुःपुत्रंदुःखितौचबभूवतुः ततोब्रवीत्स्वपितरौसंतोषेदुःखकारणम्
६ मार्कंडेयउवाच हर्षकालेकिमर्थंवादुःखमत्यद्भुतंपितः मृकंडुरुवाच
त्वयिजातेतदावत्सवागुवाचाशरीरिणी ७ मृकंडोतवपुत्रोऽयंषोडशाब्देम
रिष्यति तच्छ्रुत्वाहृदिविद्धोऽहंवज्रेणेवसुदुःखितः ८ इदानींद्वादशसमा
वर्ततेतववैसुत आवांतदनुसंस्मृत्यदुःखितौस्वसुताधुना ९ मार्कंडेयउ
वाच दुःखंतेव्यपनेष्यामितथामातुर्नसंशयः इत्युक्त्वातौनमस्कृत्वानिर्ग
तःस्वगृहात्ततः १० भृगोराश्रममासाद्यसर्वंतस्मैन्यवेदयत् तेनोक्तेनवि-
धानेनतपस्तेपेसुदुश्चरम् ११ चतुर्थेवत्सरेपुत्रोवाराणसींजगामह गंगाती
रेपदंकृत्वाशिवध्यानपरायणः १२ ततोजगामसवैकालःकालेहंतुंमृकंडुजम्
गतासुषमपिह्येनंकालोहंतुंनचाशकत् १३ गंगांबुपूर्णकलशाच्छिवःप्रत्यक्ष
तांगतः तमागतंशिवंदृष्ट्वामुनिःप्रोवाचहृष्टधीः १४ आयुर्मेनास्तिभगव

गो.मा. न्नायुर्मेसंप्रकल्पय ततोऽब्रवीन्महादेवोमृकंडुतनयंमुनिम् १५ मद्भक्ति सा.अ.
१९ र्भावितांविप्रचरस्वंतपआयुषे गोकर्णक्षेत्रमासाद्यपरितोषयकेशवम् १६ ६
सतेददातिभगवान्नायुर्वैमनसेप्सितम् यदाचायातिवैविष्णुस्तदायास्ये
त्वहंमुने १७ इत्युक्त्वांतर्दधेशंभुर्मार्कंडेयस्ततःस्वयम् जगामसिद्धमार्गे
णगोकर्णक्षेत्रमुत्तमम् १८ तत्राश्रमपदंकृत्वाधर्माश्रमसमीपतः लिंगं
तत्रप्रतिष्ठाप्यतपस्तेपेसुदुश्चरम् १९ घोरेणतपसातस्यतुतोषभगवान्ह
रिः आविर्बभूवदेवेशःप्रीतिमान्नृषिसन्निधौ २० तंदृष्ट्वादेवदेवेशंमा
र्कंडेयोऽब्रवीद्वचः नारायणनमःस्तेस्तु नमस्तेभक्तवत्सल २१ नमस्ते
लोककर्त्रेचभर्त्रेहर्त्रेनमोनमः इतिस्तुतस्तदाविष्णुःप्रीतिमानब्रवीद्वचः
२२ विष्णुरुवाच रुद्रंस्मरमहाभागेत्युक्तेरुद्रस्तदागमत् आजगाम-
ततोब्रह्माज्ञात्वारुद्रमनोगतम् २३ ब्रह्मोवाच महाविष्णोमुनिरयंगता
युरपिभक्तितः रुद्रस्यालोकनादेवजीवन्मुक्तोबभूवह २४ जन्मायुतंदे १९
वदेवत्वामाराधितवान्पुरा रुद्रेणचायुरेनंत्वमायुरस्मैप्रसादय २५ वि

ष्णुरुवाच अजरामरताविप्रमत्प्रसादाद्भविष्यति दत्तंमयापूर्वमेवशि
वभक्त्यानसंशयः २६ मार्कंडेयउवाच इदंममाश्रमपदंत्वत्प्रसादात्सु
रेश्वर ख्यातिमायातुसर्वत्रसर्वपापहरंभवेत् २७ विष्णुरुवाच आ-
श्रमस्तेद्विजश्रेष्ठलोकेख्यातिंगमिष्यति मार्कंडेयह्रदेपुण्येस्नानंकृ-
त्वायथाविधि २८ तस्यत्रिजन्माचरितंस्वल्पंवायदिवाबहु पापंप्रशम
मायातिविष्णुयागफलंलभेत् २९ इतितस्मैवरंदत्वातत्रैवांतर्दधुःसुराः मा
र्कंडेयोपिभगवान्यथाकामंजगामह ३० सूतउवाच प्रजाःसिसृक्षन्ब्रह्मातु
सृष्टवान्धर्ममुत्तमम् चतुष्पादयुतंदांतंलोकरक्षणहेतवे ३१ तमाहधर्मर
क्षत्वंसर्वास्तुमामकाःप्रजाः तच्छ्रुत्वाब्रह्मणोवाक्यंतथास्त्वितितदाब्र
वीत् ३२ दधारधर्मोभगवान्प्रजाःसर्वास्तदानृप धर्मोपिभगवान्देवःस्वां
योनिंसमचिंतयत् ३३ ज्ञात्वासूर्यविशेषाच्चवायुभूतःसनातनः तस्मिन्का
लेसभगवान्विवस्वान्लोकपावनः ३४ तपस्तेपेसगोकर्णेलिंगंसंस्थाप्यशां-
भवम् ततःशिवःप्रसन्नात्मासूर्यंप्राहकृपानिधिः ३५ सिद्धिर्भवतुतेसूर्यम

त्प्रसादान्नसंशयः लिंगमेतत्पूजकानांसर्वसिद्धिकरंभवेत् ३६ इतितस्मै
वरंदत्वातल्लिंगेऽन्तरधात्प्रभुः अंतर्हितेभगवतिसूर्यःस्वस्त्रियमास
वान् ३७ संज्ञयासहसंगम्यतस्यांधर्ममजीजनत् उत्पाद्यधर्मंसूर्यश्चयथा
स्थानमगात्प्रभुः ३८ धर्मोपितत्रभगवान्सूर्याश्रमसमीपतः कृत्वाश्रमप
दंराजंस्तपस्तेपेसुदुश्चरम् ३९ तस्यतुष्टास्तदादेवाब्रह्मविष्णुमहेश्वराः
देवाऊचुः वरंवरयभद्रंतेयत्तेमनसिवर्तते ४० इत्युक्तःप्राहधर्मोपिब्रह्मवि
ष्णुमहेश्वरान् धर्मउवाच यदिप्रसन्नायूयंमेलोकपालाश्चआदरात् ४१ ती
र्थमेतत्सुरश्रेष्ठाह्याश्रमोलिंगमेवच लोकेश्रेष्ठतमंभूयात्सर्वपापप्रणाशनम्
४२ तथेत्युक्त्वाततोदेवास्तत्रैवांतर्दधुःसुराः सूतउवाच शिवादनुज्ञांसंप्राप्य
षण्मुखोभरतर्षभ ४३ गोकर्णक्षेत्रमासाद्यकुमारेश्वरमभ्यगात् त्रयोदश
कुमारावैतस्मिन्सिद्धिमुपागताः ४४ तीर्थेगुहोदकेस्नात्वाषण्मुखोलिंगम
र्चयन् तपस्तेपेनिराहारःशिवध्यानपरायणः ४५ कार्तिकेकृत्तिकायुक्तपौ 
र्णमास्यांनृपोत्तम तस्मिन्लिंगेत्वाविरभूत्पार्वत्यासहितःशिवः ४६ ब्रह्मवि


ष्ण्वादिभिःसार्धमिदमूचेनृपोत्तम शंकरउवाच वरंवरयपुत्रत्वंयत्तेभिल
षितंहृदि ४७ षण्मुखउवाच सिद्धिमिच्छामिभगवन्तीर्थेलिंगेमहेश्वर
बहुपुण्यप्रदंचास्तुत्वत्प्रसादान्महेश्वर ४८ शिवउवाच सिद्धोऽसिपूर्वमेवत्वंदेवसेनाप
तिर्भव तारकासुरनाशायसेनानीत्वदत्तेनहि ४९ शक्तिंचापिददौतस्मैस
र्वशत्रुनिषूदिनीम् इतितस्मैवरंदत्वाशिवोदेवैःसमंविभुः ५० तत्रैवांतर्दधे
लिंगेपार्वत्यासहितःशिवः तीर्थेगुहोदकेस्नात्वाकुमारेश्वरमर्चयेत् ५१ त्रिः
सप्तकुलजैःसार्धंशिवलोकेमहीयते सूतउवाच पुराहिदारुणोनामपार्थि
वोवंगदेशजः ५२ नित्यंप्रजाःपालयेतोबभूवुःशत्रवोनृप तस्यरुंध्यापुरीं
रम्यांसप्तांगंजहुरोजसा ५३ ततस्तुदारुणोनामएकाकीवनमाश्रितः ब
हुधाक्षुत्तृषाविष्टोन्यग्रोधतलमाश्रितः ५४ उपस्पृश्यजलंतत्रभार्ययासमु
पाविशत् चिंतयानःसबहुधातस्मिन्कालेसमाहितः ५५ सनकोनामयोगीं
द्रस्त्रैलोक्यावनतत्परः तमागतमभिप्रेक्ष्यतत्पदोप्रणिपत्यच ५६ उवाच
सांजलिर्भूत्वासनकंयोगिनंतदा योगिन्प्रशासन्पृथ्वींधर्मेणसकलाःप्र

ज्ञाः ५७ शत्रवश्च बलात्कृत्य सप्तांगं जह्रुरोजसा ममराज्यं यथा प्राप्स्येत
थाकुरु महामते ५८ सनकउवाच सर्वसिद्धिप्रदं क्षेत्रं गच्छ गोकर्णसंज्ञकं कुमारेश्वर
संज्ञं तु लिंगं तत्रास्ति सिद्धिदम् ५९ त्वं तत्र गत्वा राजेंद्र स्नात्वा तीर्थे गुहोदके
कुमारेशं समभ्यर्च्य तपस्तीव्रं समाचर ६० ततः प्रसन्नो भवति पार्वत्या सहि
तः शिवः तवाभीष्टं ददेच्छंभुः स्वं राज्यं प्राप्स्यसे पुनः ६१ इति तद्भाषितं श्रु
त्वा प्रणिपत्य महामुनिम् गोकर्णक्षेत्रमासाद्य कुमारेश्वरमभ्यगात् ६२ स्ना
त्वा गुहोदके तीर्थे कुमारेश्वरमर्चयत् आविर्बभूव पुरतस्तस्माल्लिंगादुमाप
तिः ६३ राजानं प्राह राजेंद्र वाक्यमेतन्महेश्वरः तवाभीष्टं प्रदास्यामि रा
जन्ब्रूहि मनोगतम् ६४ दारुणउवाच शत्रुभिर्हृतराज्योऽहं प्राप्स्ये राज्यं
स्वकं यथा तथा कुरु महादेव त्वयि भक्तिर्भवेन्मम ६५ शंकरउवाच तथा
स्तु नृपशार्दूल स्वं राज्यं प्राप्स्यसेऽचिरात् इदं शस्त्रं त्वायुधं दृष्ट्वा शत्रवस्तव भू
पत ६६ पलायंते दशदिश इत्युक्त्वांतर्दधे हरः राजा तु दारुणो नाम भार्यया
सह पार्थिव ६७ वरं लब्ध्वा महेशात्तु शत्रून्जित्वा स्वकां पुरीम् संप्राप्य स



कलां पृथ्वीं पालयामास पूर्ववत् ६८ सूतउवाच ब्रह्मा जगत्पतिः पूर्वं स्रष्टुका
मः प्रजा नृप ध्यायतस्तस्य देवस्य जिह्वाग्राद्गलद्रसः ६९ गृहीत्वा तद्रसं
ब्रह्मा पातुकामो दधारच नशशाक दृढीकर्तुं वक्त्राकाशं व्यदारयत् ७० त
स्मान्मुखाद्बभूवाशु शशिवर्णा सरस्वती तां दृष्ट्वा चकमे देवः प्रोवाचेदं चतुर्मु
खः ७१ सरसाद्रसनादेव जातासि मम मानदे सरस्वतीति ते नाम लोके
ख्यातिं गमिष्यति ७२ द्विधा त्वं भव कल्याणी ह्येकांशेन नदी भव दिव्यस्त्री
रूपिणी भूत्वा भज मामेव भामिनि ७३ व्यक्ताव्यक्तस्वरूपेण भूतेषु वस स
र्वदा इत्युक्ता सा तथेत्युक्त्वा त्यक्त्वा देहं वरानना ७४ दक्षस्य दुहिता भूत्वा
गोकर्णे व्यचरत्तपः तीर्थं स्वं निर्मलं कृत्वा लिंगं संस्थाप्य शोभनम् ७५ तस्या
स्तपःप्रभावेन ब्रह्मा प्रत्यक्षतां गतः ब्रह्मोवाच दातास्मि ते वरं भद्रे किमिच्छ
सि शुभे वद ७६ सिद्धाहं सर्वभूतेषु चरिष्ये शाश्वतीः समाः तीर्थे स्नात्वा म
दीये तु मल्लिंगं पूजयेच्च यः ७७ वाक्पटुत्वं स लभतां त्वत्प्रसादात्सुरेश्वर सि
द्धासि पूर्वमेव त्वं जिह्वायां वस सर्वदा ७८ सरस्वतीकुंडमिति लोके ख्यातिं ग

मिष्यति इतिदत्वावरंब्रह्मातत्रैवांतर्दधेनृप ७९ सरस्वतीचब्रह्माणमुपत
स्थेसमाहिता ८० इतिश्रीस्कांदेगोकर्णखंडेगोकर्णमाहात्म्येषष्ठोऽध्यायः ६
सृष्ट्यर्थंधातृवक्त्रेभ्योजज्ञिरेभारततदा वेदाश्चतुर्भ्यश्चत्वारःसरहस्याःस
शाखकाः १ एकीभूताःपुनस्तान्वैलोलयामासतंब्रजः वेदराशौमथ्यमाने
गायत्रीसमजायत २ वेदेषुसारभूतत्वात्सावित्रीचापिकथ्यते गायंतंत्रायमा
णत्वाद्गायत्रीचेतितांविदुः ३ उवाचपद्मभूर्देवींगोकर्णेतपआचर मन्नियो
गकरीपश्चान्मद्देशेतिष्ठभामिनि ४ एवंकरिष्येदेवेशेत्युक्त्वाचांतरधीयत
ततश्चुकोपसावित्रीमशपच्चतुराननः ५ शरीरंनाशमायातुतवशीघ्रंवरान
ने त्यक्त्वाशरीरंसादेवीवायुभूताचचारह ६ ततोगोकर्णमासाद्यचचारतप
उत्तमम् तीर्थंकृत्वास्वविमलंब्रह्माप्रत्यक्षतांगतः ७ गायत्रींचापिसावित्रीं
वरंब्रूहीत्युवाचह गायत्र्युवाच सिद्धिमिच्छामिभगवन्तीर्थंश्रेष्ठतमंभवेत्
८ ब्रह्मोवाच सिद्धिर्भवतुतेभद्रेतीर्थेयेस्नांतिभामिनि तेषांत्रिजन्मचरि
तंपापंनश्यत्यसंशयः ९ सावित्र्युवाच शरीरंप्रार्थयेदेवत्वत्प्रसादाज्जगद्गु



रो इतितस्यावचःश्रुत्वाब्रह्मादत्वाशुभंवपुः १० गायत्र्यानैवसावित्र्यासहि
तःस्वपदंययौ सूतउवाच मात्राशप्ताःपुरानागाउच्चैःश्रवसःकारणात् ११
गोकर्णक्षेत्रमासाद्यतपश्चक्रुःसमाहिताः तीर्थंस्वनिर्मलंकृत्वालिंगंसंस्थाप्य
शांभवम् १२ एवंतपस्यतांतेषांब्रह्माप्रत्यक्षतांगतः ब्रह्मोवाच नागावृणी
ध्वंदास्यामियुष्माकंयदभीप्सितम् १३ नागाऊचुः मात्राशप्तावयंब्रह्मंस्त
न्मोक्षंनोप्रसादय इतितेषांवचःश्रुत्वाब्रह्मानागानुवाचह १४ मातृशापोन
भविताभत्प्रसादान्नसंशयः तीर्थमेतन्महाभागलिंगंयुष्माभिरर्चितम् १५
सर्वसिद्धिकरंचास्तुमातृशापविमोक्षदम् इतितेषांवरंदत्वाब्रह्माचांतरधीयत
१६ नागतीर्थेतुपंचम्यांस्नात्वातल्लिंगमर्चयेत् मातृशापोनभवितासर्पशापो
विनश्यति १७ सूतउवाच पुरातुभार्गवोरामोहत्वाक्षत्रियसंततिम् कश्य
पंमुनिशार्दूलंयज्ञार्थंचसमाह्वयत् १८ यज्ञंकृत्वातदारामस्तस्मैप्रादाद्वसुं
धराम् तांभूमिंकश्यपोराजन्ब्राह्मणेभ्यःप्रदत्तवान् १९ अराजकातदाचा
सीत्सर्वाभूमिर्महीपते बभूवातितरांलोकेह्यधर्मोलोकनाशकः २० ततो

भूमिस्तदाधर्मंसोढुंनक्षमतेऽनघ ततोगोकर्णमासाद्यशतशृंगस्यमूर्ध
नि २१ अधोभागंप्रविश्यैवतपस्तीव्रमतप्यत भूमिश्चकाश्यपीचक्रेदि
व्यवर्षसहस्रकम् २२ ततस्तुष्टोमहादेवोवरंब्रूहीत्यभाषत भूमिरुवाच
अराजकमिदंविश्वंयथापूर्वंकुरुप्रभो २३ शंकरउवाच राजन्वतीभवशु
भेकाश्यपीतिवसुंधरे इदंतवतपस्थानंगोगर्भमितिविश्रुतम् २४ अत्रप्र
विशतांनृणांनभवेद्गर्भसंस्थितिः इतिदत्वावरंभूम्यैशंकरोऽतरधीयत २५
भूमिस्त्वंप्राप्यसादेवीयथापूर्वमतिष्ठत सूतउवाच ब्रह्मणोमानसःपुत्रोव
सिष्ठोमुनिपुंगवः २६ हिमवत्पर्वतेरम्येतपःकुर्वन्नुवासह इक्ष्वाकुर्नाम
नृपतिर्वरयामासतंगुरुम् २७ शुश्रूषयास्ववंशस्यतथास्त्वित्यवदन्मुनिः
तदन्वयेत्वभूद्भूपोनिमिःपरमधार्मिकः २८ कदाचिन्मृगयांकृत्वागृहेसुप्तो
महीपतिः तदावसिष्ठोह्यगमत्तद्गृहद्वारदेशतः २९ सुप्तंद्वाःस्थमुखाच्छ्रु
त्वाददौशापंनृपायसः शरीरंतेविनश्येतराजन्मदवमानतः ३० इतिशप्त्वा
ययौसोपिस्वाश्रमंप्रतिभूपते ततःप्रबुद्धोराजापिश्रुत्वाशापंगुरोस्तदा ३१



स्वगुरुंशप्तवान्सोपिराजापरमधार्मिकः अनागसंमांविप्रेंद्रयस्मात्त्वंशप्त
वानसि ३२ तस्मात्तवापिदेहस्तुनश्यत्येवनसंशयः सूतउवाच ब्रह्मलोकं
गतौराजन्नुभौतौवायुरूपिणौ ३३ चिंतयामासतौदृष्ट्वाब्रह्मामुनिमुवाचह
मुनेत्वंगच्छगोकर्णंतपोवनमनुत्तमम् ३४ मित्रावरुणनामानौमुनिस्तत्रतप
स्यतः तत्रगत्वामहादेवंशरीरंपुनराप्नुहि ३५ ततोनिमिमुवाचेदंकिमि-
च्छसिनृपोऽधुना निमिरुवाच शरीरंनाशसहितंनेच्छामिसुरसत्तम ३६
चक्षुषोःसर्वमर्त्यानांवसामित्वत्प्रसादतः तथास्त्वित्यब्रवीद्ब्रह्मादृशोर्वस
नृणांसदा ३७ तदारभ्यनराःसर्वेसनिमेषास्तदाभवन् ततोवसिष्ठःसंप्रा
प्यशरीरंवरुणान्मुनेः ३८ तपश्चकारसचिरंगोकर्णेतपसोवने लिंगंतत्र
प्रतिष्ठाप्यतीर्थंकृत्वासुनिर्मलम् ३९ ततोमहेश्वरात्प्राप्ययोगसिद्धिंतदा
मुनिः इच्छावासंभूतलेचयथाकामंजगामह ४० ब्रह्मणोमानसःपुत्रःकु
शिकोनामपार्थिवः कुशनाभिस्तस्यसुतोगाधिस्तस्यत्वभूत्सुतः ४१ सोपि
दुर्वाससस्तुष्टात्कन्यारत्नंचलब्धवान् भृगुपुत्रोऋचीकस्तुतेह्युपयेमेचक

न्यकाम् ४२ ततोभृगुस्तन्निशम्यययौपुत्रनिकेतनम् सपत्नीकंसुतंदृष्ट्वा
उवाचस्वस्नुषांमुनिः ४३ पुत्रस्तेभविताभद्रेमातुस्तेपिनसंशयः आलिं
ग्यतांपृथग्वृक्षंसाश्वत्थकमुदुंबरम् ४४ इत्युक्त्वासयथाकामंजगामस्वाश्र
मंप्रति आलिंगनेऽन्यथातेतुचक्रातेवरयोषितौ ४५ ततोगर्भःसमभवत्त
योरपिनृपोत्तम ततोभृगुरगाद्भूयःपुत्रपत्नीमुवाचह ४६ आलिंगनेऽन्यथा
भद्रेयुवाभ्यांहिकृतंत्वभूत् तस्मात्तवसुतोभद्रेक्षत्राचारोभविष्यति ४७
मातातवमहाभागेक्षत्रियोब्राह्मणोभवेत् सत्यवत्युवाच पुत्रोमेमुनिशा
र्दूलब्राह्मणाचारवान्भवेत् ४८ भृगुरुवाच तथास्तुभद्रेपौत्रस्तेक्षत्राचारो
भवेद्ध्रुवम् इत्युक्त्वाप्रययौसोपियथाकामंस्वमाश्रमम् ४९ ततोगाधेःसु
तोजातोविश्वामित्रःप्रतापवान् धर्मेणपालयामासमेदिनींसनृपोत्तमः ५०
कदाचिन्मृगयासक्तोहिमवद्गहनंययौ नानाविधान्मृगान्हत्वावसिष्ठस्या
श्रमंययौ ५१ विश्रांतंनृपतिंज्ञात्वावसिष्ठोवाक्यमब्रवीत् स्थीयतामत्रनृ २४
पतेभोजयिष्याम्यहंक्षणात् ५२ इत्युक्त्वाहूयसुरभिंनंदिनीमिदमब्रवीत्

सबलस्यनृपस्यास्यदेहिभोजनमुत्तमम् ५३ तथेत्युक्त्वातुसादेवीविचि
त्राणिगृहाणिच हस्तिशालादीनितथाअन्नंबहुविधंतथा ५४ पानानिवस्त्रा
भरणंदुदोहसुरभिःक्षणात् ततस्तुसबलोराजास्नात्वापीत्वामुमोदह ५५
भुक्त्वोवाससुखंराजास्वर्गेसुकृतवान्यथा व्यपनीयनिशांतांतुवसिष्ठंवाक्य
मब्रवीत् ५६ कामधेनुरियंब्रह्मन्ममयोग्यामुनीश्वर अयुतेनगवांब्रह्म
न्ममैनांदातुमर्हसि ५७ वसिष्ठउवाच नदेयागौर्नृपश्रेष्ठब्रह्मस्वंविषमु
च्यते इत्युक्तस्तेनराजासौकोपमाहारयद्भृशं ५८ नेष्यामिगांबलाद्विप्र
रत्नार्हःक्षत्रियोह्यहम् इत्युक्त्वाकौशिकोराजागृहीत्वातांपयस्विनीम् ५९
ययौस्वनगरींगंतुंधेनुर्मुनिवरंह्यगात् उवाचचकिमर्थंमांत्यक्तवानसिस्क
ब्रन ६० वसिष्ठउवाच विश्वामित्रबलैःक्रूरैर्बलात्त्वंनीयसेशुभे इतिश्रु
त्वामुनेर्वाक्यंधेनुराकाशगाभवत् ६१ योधान्ससर्जविविधान्नानाप्रहरणो
द्यतान् क्षणात्तेनाशयामासुर्विश्वामित्रस्यवाहिनीम् ६२ ततोरुद्रंसमा
राध्यरुद्रदंडमवाप्यच वसिष्ठंपुनरागम्यरुद्रदंडंव्यचिक्षिपत् ६३ ज

ग्रासरुद्रदंडंतंवसिष्ठोमुनिपुंगवः निर्भिद्यमुनिदेहंतंरुद्रदंडोद्यगाच्छिवम्
६४ ब्रह्मादंदौमुनेः क्षेत्रंविश्वामित्रोपिपार्थिव ब्राह्मणेषुबलंमत्वाधिक्कृत्वा
क्षत्रियंबलम् ६५ गोकर्णक्षेत्रमासाद्यशतशृंगस्यमूर्धनि लिंगंतत्रप्रतिष्ठा
प्यतीर्थंकृत्वाद्यधस्ततः ६६ तपश्चकारसुचिरंवर्षाणामयुतंप्रभुः आविर्ब
भूवुस्तल्लिंगाद्ब्रह्मविष्णुमहेश्वराः ६७ विश्वामित्रंतदावाक्यमब्रुवंस्तेनरो-
त्तम वरंवरयभद्रंतेवरदाःस्मोवयंमुने ६८ विश्वामित्रउवाच यदिप्रसन्ना
यूयंमेब्राह्मण्यंप्रार्थयाम्यहम् तीर्थंलिंगंसुरश्रेष्ठास्त्रैलोक्येनोत्तमंभवेत् ६९
इतितस्यवचःश्रुत्वाब्रह्मविष्णुमहेश्वराः ब्राह्मण्यंचददुस्तस्मैब्रह्मदंडंचपू
ज्यताम् ७० तस्यलिंगस्यतीर्थस्यलोकेश्रैष्ठ्यंचपार्थिव इतिदत्वावरंतस्मैत
त्रैवांतर्दधुःसुराः ७१ विश्वामित्रोपिब्राह्मण्यंगोकर्णेप्राप्यपार्थिव लोकेश्रेष्ठ
तमोभूत्वाचचारसमहामुनिः ७२ तस्यतीर्थेनरःस्नात्वातल्लिंगंपरिपूज्यन ज
पेद्योब्राह्मणोलोकेगायत्रींलक्षसंख्यया ७३ सप्तजन्मभवेद्विप्रोवेदवेदांगपार २५
गः सूतउवाच सुमित्रोनामविप्रेंद्रःपौलस्त्यकुलसंभवः ७४ गोकर्णक्षेत्र

मासाद्यस्थाप्यलिंगंतपोवने तपसामहतातत्रतोषयामासशंकरम् ७५ शि
वःसान्निध्यमकरोत्तस्मिंल्लिंगेशिवान्वितः तज्ज्ञात्वामुनयःसर्वेह्यानेतुं
जाह्नवींनृप ७६ परस्परंसमालोक्यकोटितीर्थाग्निदिक्तटे विघ्नेश्वरंपूजयि
त्वासुमित्रंमुनिमागमन् ७७ ऋषयऊचुः सिद्धोऽसितपसाब्रह्मंछिवसान्नि
ध्यकारणात् अस्मन्मनोगतंसर्वंकर्तुमर्हसिसुव्रत ७८ गंगांत्रिपथगांविप्र
पातालतलवासिनीम् सर्वलोकहितार्थायतपसोद्धर्तुमर्हसि ७९ इतितेषां
वचःश्रुत्वासुमित्रःपूज्यशंकरम् प्रत्यक्षीकृत्यसशिवमिदमूचेमहेश्वरम् ८०
देहिगंगांमहादेवींहितार्थंजगतोऽस्यवै इतितस्यवचःश्रुत्वागंगांसस्मारशं
करः ८१ तत्तस्यचिंतितंज्ञात्वागंगायातान्नृपोत्तम शतशृंगगिरेर्मूर्ध्नि ह्रादि
नीपर्यवर्तत ८२ गंगाधारेतितामाहुर्मुनयस्तत्वदर्शिनः दृश्यादृश्येवसा
देवीप्लावयामासगोःश्रुतिम् ८३ सप्तजन्मकृतंपापंतत्रस्नानाद्विनश्यति
८४ इतिश्रीस्कांदेगोकर्णखंडेगोकर्णमाहात्म्येसप्तमोऽध्यायः ७ छ
पुराखरासुरोगत्वाशतशृंगंमहागिरिम् क्रीडावनगतांतत्रपार्वतींसंददर्श

ह १ गृहीतुकामस्तांपापस्तपोघोरमतप्यत ततस्तुष्टंमहेशानमुवाचखर
पुंगवः २ खरउवाच यस्यमूर्ध्निक्षिपेहस्तंभस्मसात्सभवेद्विभो तथास्त्वि
तिशिवेनोक्तेहंतुंदेवंमहेश्वरम् ३ अभ्यधावत्सुदुष्टात्माशिवोदृष्ट्वापलाय
त तंदृष्ट्वाभगवान्विष्णुःकिमेतदितिचोक्तवान् ४ सर्वंचोवाचगिरिशोविष्णु
र्मायांप्रसृष्टवान् एकांशेनशिवेनाऽसौसहपूर्वांदिशंययौ ५ ददर्शनारींदैत्ये
न्द्रोमाययाविष्णुनिर्मिताम् विस्मृत्यपार्वतींसोपिचकमेतांसुलोचनाम् ६ उ
वाचखरःसुभगेत्वद्यत्वयामेऽपहृतंमनः एहिसार्धंमयासुभ्रूश्चिरंरमयस्वमा
म् ७ त्रिपुरघ्नेनमेदत्तोवरश्चान्यैःसुदुर्लभः यस्यमूर्ध्निक्षिपेहस्तंभस्मसा
त्सभवेद्ध्रुवम् ८ शिवंहत्वातुशर्वाणींरमेयमितिमेमतिः तच्छ्रुत्वाभग
वान्विष्णुःकन्यकास्मिवरार्थिनी ९ त्रिपुरघ्नेनयोदत्तोदीयतेतद्वरोयदि सं
गमोऽस्तुमयातेद्यद्यन्यथानभवेद्ध्रुवम् १० तच्छ्रुत्वाद्यददत्सोपिवरंप्राप्तं
महेश्वरात् ततोजग्राहतांकन्यांततोऽसौतत्करंदधौ ११ कंठेकरंप्रगृह्या 
शुदृढंवामकरेणसः दक्षिणंमूर्ध्नितस्याशुन्यस्त्वाभस्मभवेदिति १२ उ

वाचचखरःसोपिभस्मशेषमजायत ततोदेवाःपुष्पवृष्टिंववर्षुस्तत्रपार्थिव
१३ सूतउवाच उपसंहृतवानाद्यःस्त्रीरूपंगरुडध्वजः एकांशेनतुपाताले
सार्धंरुद्रेणसंस्थितः १४ उवाचशंकरंविष्णुस्तवशत्रुर्हतोमया इत्युक्तोविष्णु
नासार्धंवैतरण्यासमन्वितः १५ यस्माद्देशादुपाक्रामत्तदुन्मज्जनमुच्यते
तीर्थानामुत्तमंतीर्थंनदीवैतरणीचसा १६ उन्मज्जनपुरोभागेसर्वतीर्थसम
न्विता दृश्यादृश्यानदीभूत्वाकोटितीर्थंसमाविशत् १७ संभूयतास्तुगौर्या
सासमुद्रंप्रविवेशह वैतरण्यांनरःस्नात्वासर्वपापैःप्रमुच्यते १८ उन्मज्जने
नरःस्नात्वाविराजतियथोडुराट् तस्मिन्सिद्धःपुरानागएलापत्रोमहाबलः
१९ एलावनमितिख्यातमभितोन्मज्जनान्नृप ततोहरिहरौगत्वापुराहरिह
रंशुभम् २० उवाचशंकरःशौरिंस्त्रीरूपंतत्प्रदर्शय दर्शयित्वातुतद्रूपंशं
करायतदाहरिः २१ आचक्ष्वसर्ववृत्तांतंखरासुरवधेकृतम् दृष्ट्वातिसुंद
रंरूपंशंकरोविस्मितोऽभवत् २२ शंकरउवाच रूपेणानेनतिष्ठात्रमया
सहजनार्दन इत्युक्त्वालिंग्यतंदेवोनरनारीश्वरोऽभवत् २३ तस्मिन्नेवपुरे

 देवावेकमूर्तिधरौस्मृतौ पुरंहरिहरंनामगोकर्णेसुरपूजितम् २४ तस्मिन्दा- 
नानिदत्तानिदेवभोग्यानिसत्तम त्रिःसप्तकुलजैःसार्धंदातास्वर्गमवाप्नुया
त् २५ पुरेहरिहरेचास्तिमंटपत्रितयंनृप वैराग्यदंज्ञानदंचमुक्तिदंचनृपो
त्तम २६ उत्तरस्यांस्थितंयत्तुवैराग्यंमंटपंस्मृतम् तत्रमासंमुषित्वातुगाय-
त्रीजपमाचरेत् २७ देवयोःपुरतोयत्तुमंडपंज्ञानदंविदुः अष्टाक्षरंजपेन्मंत्रं
तत्रमासंनृपोत्तम २८ सज्ञानंसफलंलब्ध्वाविष्णुसायुज्यमाप्नुयात् त
तोनिर्ऋतिदिग्भागंस्थितंवैमुक्तिमंटपम् २९ तस्मिन्मृताश्चयेकेचित्पापा-
त्मानोपिमानवाः सर्वपापविनिर्मुक्ताःप्रयांतिपरमांगतिम् ३० प्रयाणसमये
यस्तुतत्रशेतेहरिंस्मरन् नामसंकीर्तनंकुर्वन्समीपंपुरुषोत्तम ३१ आग
त्यदययातस्यस्वकरंमूर्ध्निनिक्षिपेत् ब्रह्मोपदेशंकुरुतेसब्रह्माजायतेध्रुवम्
३२ सूतउवाच धर्मराजस्यदुहितानदीवैतरणीनृप स्वभर्तुर्वरुणस्यैषासं
केतंनययौयतः ३३ ततःशशापतांभर्ताशोणितोदानदीभव ततःप्रसाद 
यामासभर्तारंसाशुचिस्मिता ३४ ततःप्रसन्नस्तामाहभर्ताहरिहरौशुभे

यदापाताललोकस्थौतदायाहिरसातलम् ३५ दृष्ट्वाहरिहरौतत्रतपश्चरसुदु
श्चरम् ततस्तयोःप्रसादेनशापमोक्षोभवेद्ध्रुवम् ३६ इत्युक्त्वापतिनासातु
रुधिरोदानदीह्यभूत् ततःपातालमागत्यदृष्ट्वाहरिहरौनृप ३७ तपसातो
ष्यतौदेवौशापान्मुक्ताबभूवसा वैतरण्यासमंदेवौपातालादूर्ध्वमागतौ ३८ भ
र्तृशापाद्विमुक्तासापतिनासहसंस्थिता तस्यांस्नातःसर्वतीर्थस्नातोभवतिमा
नवः ३९ तस्मादुन्मज्जनतीर्थादाग्नेय्यांदिशिपार्थिव दुर्गादेवीयशोदायांभ
दुर्भूतांतरिक्षगा ४० गोकर्णक्षेत्रमासाद्यवैतरण्याःसमीपतः तीर्थंकृत्वानिर्म
लंकृत्वातपःकृत्वास्थनिश्चला ४१ विष्णुवाक्यात्ततोदेवीविंध्याचलमगान्नृप
एकांशेनावसत्तत्रशतशृंगतटेशुभे ४२ सूतउवाच पुरापंडुसुतोराजाधर्म
पुत्रोयुधिष्ठिरः भुवंप्रदक्षिणांकुर्वन्गोकर्णक्षेत्रमागमत् ४३ आदौस्नात्वा-
कोटितीर्थेपूजयित्वामहाबलम् शतशृंगतटेरम्येतीर्थंकृत्वासुनिर्मलम् ४४
वार्षिकांश्चतुरोमासानुषित्वातत्रपांडवः ततोद्वैतवनंप्रायाद्भ्रातृभिःसहपार्थि
व ४५ तदेतत्पांडवंतीर्थंयत्रोवासयुधिष्ठिरः सूतउवाच रावणादीन्रणेहत्वा

रामोराक्षसपुंगवान् ४६ कृताभिषेकोराजेंद्र अयोध्यामध्यतिष्ठत ततोऽगस्त्य
मुखाच्छ्रुत्वारावणंब्रह्मवंशजम् ४७ ब्रह्महत्याभयाद्भीतोवसिष्ठोक्त्यात तोऽगम
त् सीतालक्ष्मणसंयुक्तोयुतोवायुसुतेनच ४८ गोकर्णक्षेत्रमासाद्यतपःकृत्वा
सुनिश्चलम् प्रत्यक्षीकृत्यगिरिशंहत्यापापाद्विमुक्तवान् ४९ क्षेत्रयात्रांततःकृ
त्वापूजयित्वामहाबलम् अयोध्यांस्वांपुरींगत्वायथापूर्वमतिष्ठत ५० रामती
र्थेस्नानमात्राद्ब्रह्महत्याविनश्यति सूतउवाच पुराकृतयुगेतातवैदर्भःपृ
थिवीपतिः ५१ भीमोनामस्वतनयेराज्यंन्यस्यवनंययौ पत्न्यासहविर-
क्तःसन्शतशृंगंमहागिरिम् ५२ तपस्तेपेनिराहारोघोरमुद्दिश्यशंकरम् प्र
त्यक्षीकृत्यगिरिशंशाश्वतंस्वर्गमाप्तवान् ५३ तीर्थंतदेतन्नृपतेसर्वपापह
रंपरम् भीमकुंडमितिख्यातंसर्वलोकेषुविश्रुतम् ५४ सूतउवाच भृगुवंशो
द्भवःपूर्वमौर्वोनाममहामुनिः क्रोधाविष्टस्तपस्तेपेदग्धुकामश्चराचरम् ५५
गोकर्णेशतशृंगेतुरुद्रमाराधयच्चिरम् प्रत्यक्षीकृत्यसशिवंत्रिलोकीदाहनो
द्यतोऽभवत् ५६ ज्वालामालीविरूदृश्वदृष्ट्वाब्रह्माविभावसुम् देवैःसमंप्रार्थयि 

त्वाविष्णुर्गोकर्णमागमत् ५७ चक्रेणवेष्टयामासतंवह्निंमधुसूदनः ऊर्ध्वं
चंद्रमसंस्थाप्यऔर्वमाहजनार्दनः ५८ कोपःसंह्रियतांविप्रसंहारोनो-
चितोऽधुना अंतेसंहारकस्त्वंवैभवविप्रमदाज्ञया ५९ तीर्थमौर्वाख्यमि
तितत्ख्यातिर्भवतुसर्वतः इत्युक्त्वाभगवान्विष्णुर्देवैःसार्धमदृश्यताम्
६० सूतउवाच मातृदास्यविमोक्षार्थंगरुडःपततांवरः जित्वादेवासुरान्
युद्धेसुधामाहृतवान्पुरा ६१ गरुडेननृपश्रेष्ठनिक्षिप्तंयत्रचामृतम् तत्राभ
वच्चांद्रतीर्थंसर्वलोकैकपावनम् ६२ तत्रचौषधजातानिजज्ञिरेत्रीणिपार्थि
व सोममालीसुमालीचसमालीनितिचत्रयम् ६३ महतातपसालभ्यान्य
लभ्यानिचपापिनाम् सूतउवाच चंद्रायप्रददौदक्षःसप्तविंशतिकन्यकाः
६४ तासांमध्येसुरूपैकाचतुर्थीरोहिणीशुभा सर्वाःस्त्रियःपरित्यक्त्वाता
मेवरमयत्ययम् ६५ ततोदक्षःप्रकुपितोह्यशपच्चंद्रमंजसा क्षयरोगीभव
त्वंहिस्त्रीणांभेदकरोयतः ६६ ततोदक्षोयथाकामंजगामनृपसत्तम चंद्रोपि
पितृवाक्येनगोकर्णक्षेत्रमागमत् ६७ सोमतीर्थंसमासाद्यतोषयामास

शंकरम् तदाशापाद्दिसुक्तोऽभूत्सिद्धिंप्राप्यमहेश्वरात् ६८ मूर्ध्निस्थान
मवापाग्र्यंशिवस्यद्विजराट्तदा सूतउवाच त्वष्टुःप्रजापतेःकन्याभार्या
सूर्यस्यचाभवत् ६९ सासहंतीभर्तृतेजःपितृवेश्मजगामह तज्ज्ञात्वास
वितावापित्वष्टुर्गृहमुपागमत् ७० ततस्त्वष्टासहासंभ्यत्रिदशैःसहपार्थिव
तेजोविशातयामासयंत्रमारोप्यतंशनैः ७१ तद्देशोप्यपतद्राजञ्छतशृंग
तटेशुभे तेजसातेनवैचक्रेरौद्रंचक्रंसुदर्शनम् ७२ तत्सूर्यतीर्थंविख्या
तंयत्रकीर्णारवेःकणाः तत्रस्नातःसर्वतीर्थैस्नातोभवतिमानवः ७३ सू
तउवाच नागराजःसुधांपीत्वातपस्तेपेऽतिदारुणम् तस्यतत्तपसारा
जञ्छिवःप्रत्यक्षतांगतः ७४ शिवउवाच वरंवरयभद्रंतेनागराजददामि
ते अनंतउवाच बलेधैर्येतथाधुर्येनमत्तोऽस्त्वधिकोभवेत् ७५ ज्ञानंदेहिम
हादेवतीर्थंश्रेष्ठंभवेदिदम् शिवउवाच तथास्त्वितिशिवोप्युक्त्वा तत्रैवांतर
धीयत ७६ ततोऽनंतःप्रविश्याब्धिंजलमार्गेणपार्थिव स्वस्थानमगमत्सो २९
पिनागेंद्रैःसंस्तुतःस्वयम् ७७ ततोऽनंतदृषद्राजन्पाषाणोलोकविश्रुतः

शिलायांदृश्यतेमार्गःसमुद्रेचनराधिप ७८ शिलायांवर्ततेतीर्थंनागराजस्य
पार्थिव तस्मिन्स्नातःसर्वतीर्थैस्नातोभवतिमानवः ७९ दृष्ट्वातत्रशिला
मार्गंसर्वपापक्षयोभवेत् सर्वदेवमयंसाक्षाच्छिंशुमारःप्रजापतिः ८० त
पस्तेपेनिराहारःसिद्धिमिच्छन्पुरानृप घोरेणतपसातस्यतुतोषभगवा
न्हरः ८१ प्रत्यक्षमगमत्तस्यवरंब्रूहीतिचाब्रवीत् शिंशुमारउवाच सि
द्धिमिच्छामिभगवन्परांसिद्धिंप्रदेहिमे ८२ तीर्थंमन्नामकंभूयात्स्नाताःसि
द्धाभवंतुवै हरउवाच सिद्धिर्भवतुतेत्वत्रस्नाताःसिद्धाभवंतुवै ८३ तीर्थ
मेतच्छिंशुमारत्वन्नाम्नाख्यातिमेष्यति इत्युक्त्वाभगवाञ्छंभुस्तत्रैवांतर
धीयत ८४ तत्तीर्थस्नानमात्रेणसर्वान्कामानवाप्नुयात् प्राणिनांक्षेत्रभू
तंतत्तस्मात्सर्वमयंत्विदम् ८५ इतिश्रीस्कांदेगोकर्णखंडेगोकर्णमाहा
त्म्ये अष्टमोध्यायः ८

सूतउवाच सनत्कुमारोभगवान्गोकर्णात्क्रोशमात्रतः कृत्वाश्रमपदं
तत्रतपस्तेपेसुदुश्चरम् १ ततस्तस्यापिभगवानाविरासीत्सदाशिवः स

गो.मा. नत्कुमारंभगवाँस्तुष्टोऽस्मीत्याहतंनृप २ सनत्कुमारउवाच लिंगमेत मा.अ.
३० न्नराःस्पृष्ट्वास्वर्गंगच्छंत्यवारिताः योगेश्वराभिधानेनत्रैलोक्येविश्रुतंभ ९
वेत् ३ तथास्त्वितिहरेणोक्तालिंगेतस्मिन्व्यलीयत सनत्कुमारोनृपतेय
थाकामंजगामह ४ स्पृष्ट्वातत्सर्वभूतानिस्वर्गंगच्छंत्यहर्निशम् महापा
तकयुक्ताश्चह्युपपातकिनस्तथा ५ तिर्यग्योनिगताश्चापिसर्वेपिनृपसत्त
म पूर्णआसीद्देवलोकोनावकाशोत्यभून्नृप ६ ततोब्रह्मासमागम्यदे
वैश्चऋषिसत्तमैः प्रत्यक्षीकृत्यदेवेशमिदंवचनमब्रवीत् ७ सनत्कुमा
रेणविभोगोकर्णेस्थापितंशुभे योगेश्वराभिधंलिंगंतत्स्पृष्ट्वाप्राणिनोध्रु
वम् ८ सशरीरंदिवंप्राप्तास्तैर्वयंबाधिताभृशम् तच्छ्रुत्वाऽतदाविष्णुश्च
क्रंसगृह्यपाणिना ९ चिक्षेपलिंगमुद्दिश्यछिन्नमासीत्तदानृप अधोभागः
स्थितोभूमौचक्रोपरितथापरः १० भग्नमासीत्तदाचक्रंभारेणमहतानृप त
पोर्थंविष्णुनासार्धंदेवागोकर्णमागमन् ११ रुद्रमाराधयामासुश्चक्रार्थंतेदि ३०
वौकसः अवतारयामासशिवःपातालेतच्छिरोमहत् १२ ततस्तस्मात्सुन

श्चक्रमुत्तारयतोनृप तच्चक्रतीर्थंविख्यातंसर्वपापप्रणाशनम् १३ चक्रेण
खंडितत्वाच्चचक्रखंडेश्वरोत्यभूत् पूजयित्वातुतल्लिंगंदेहांतेस्वर्गमाप्नुयात्
१४ सूतउवाच पुराकृतयुगेराजन्ग्रहणेभास्करस्यच पुष्यमासेतदालो-
काःसर्वेगोकर्णमाययुः १५ तान्दृष्ट्वासमितिंराजन्गौरीरवेशंकरंजगौ कि
मर्थंवैमहादेवअत्रागच्छंतिवैप्रजाः १६ शिवउवाच अद्यापराण्हेग्रहणं
भविष्यतिवरानने स्नात्वात्रपूज्यमांभक्त्यासर्वेयांतिशिवंध्रुवम् १७ दे
व्युवाच सर्वेषांस्वर्गतिप्राप्तौनावकाशोभवेद्दिवि शिवउवाच दर्शिष्येऽ
हंतवशिवेक्षिप्रंत्वंकपिलाभव १८ पुरुकुत्सस्तुतंपंकंप्रविवेशतदानृप न
शक्तोभूत्समुद्धर्तुंयत्नवानपिपार्थिव १९ आत्रेयोनामविप्रोपिततःपंकंप्र
विष्टवान् उभावपिनशक्तौतौस्फ्रहोत्रस्तत्रचागमत् २० त्रयोगोमिथुनंय
त्नादुद्धृत्येदंतदाब्रुवन् अपराधःकृतोऽस्माभिःक्षम्यतांपितरौध्रुवम् २१
प्रत्यक्षमगमत्तेषांदेव्यासार्धंमहेश्वरः उद्धृत्यतान्द्विजवरान्स्वीचकारत
तोहरः २२ सर्वेस्नातुंययौतीर्थेग्रहणेभास्करस्यहि यत्रगोमिथुनंमग्नं

तीर्थंतत्कापिलंविदुः २३ मासिभाद्रपदेकृष्णाषष्ठीभौमार्कसंयुते स्नानंकु
र्वंतिवैमर्त्यास्तेभवाब्धिंतरंतिवै २४ सूतउ० अरण्योनामराजातुराज्यंत्यक्त्वाविर
क्तिमान् पुत्रेराज्यधुरंन्यस्यगोकर्णक्षेत्रमागमत् २५ तीर्थंकृत्वाविधाने
नतपस्तेपेनिरामयम् प्रसन्नीकृत्यदेवेशंसिद्धिंप्राप्यमहेश्वरात् २६ त
त्रोवासयथाकामंगोकर्णेक्षेत्रसत्तमे तत्तीर्थस्नानमात्रेणराजसूयफलंल
भेत् २७ सूतउवाच स्कनादोनामविप्रेंद्रःपातालतलमागमत् मणिना
गगृहेतत्रगृहीत्वालिंगमुत्तमम् २८ गोकर्णक्षेत्रमासाद्यस्थाप्यलिंगंमनो
रमम् सिद्धिंमहेश्वरात्प्राप्यसायुज्यमगमदृषिः २९ नादेश्वरमितिख्यातं
तल्लिंगंभरतर्षभ अधःस्थादवनेराजन्विधानंतत्रवर्तते ३० ताड्यमानेपदा
तत्रनादयत्यवनीतलम् तीर्थंतत्रतुतस्यैवनादतीर्थमितिश्रुतम् ३१ दृष्टमा
त्रेतुतल्लिंगेस्वर्गंगच्छंतिदेहिनः सूतउवाच अशोकोनामराजासीत्प्लक्षद्वी
पाधिपःपुरा ३२ तस्यचासीत्पुत्रशतंतथापौत्रादिसंततिः कन्याशतंचतस्या
सीत्स्वंराज्यंपर्यपालयत् ३३ ततःशत्रुरभूत्तस्यसुमतिर्नामपार्थिवः अ-

शोकस्यपुरींरुंध्वायुद्धंकृत्वासुदारुणम् ३४ अशोकंनृपतिंजित्वापुत्रादीन
वधीत्ततः ततःसराजासप्तांगंहित्वावन्हेःप्रसादतः ३५ लब्ध्वंतुरगमा-
रुह्यजंबुद्वीपंययौक्षणात् गोकर्णेशतशृंगाद्रौदृष्ट्वास्वस्यपितामहान् ३६
अग्निद्युतिंचाग्निबाहुंमेधाश्वंपुरुमेवच तेषांचैवोपदेशेनतैःसार्कंतपआचर
त् ३७ आविर्बभूवपुरतस्तुष्टोस्मीत्याहतंशिवः अशोकउवाच शत्रुभिर्हृ
तराज्योऽहंमृतास्तेममबांधवाः ३८ अहंराज्यंयथालप्स्येबंधुयुक्तोभवाम्य
हम् तथाकुरुमहादेवत्राहिमांशरणागतम् ३९ रुद्रउवाच जीवंतुस्कंदद
स्तेवैस्वंराज्यंप्राप्स्यसेपुनः शोकोनभवितभूयःप्रसादान्ममतेनृप ४० इ
तिदत्वावरंशंभुस्तत्रैवांतरधीयत अशोकःस्वांपुरींप्राप्ययथापूर्वमतिष्ठत
४१ अशोकपंचकमितितीर्थानांपंचकंनृप स्नात्वावैशाखपूर्णायांदुष्टसंगा
द्विमुच्यते ४२ सूतउवाच कामाघनाशिनीनामनदीपापहराशुभा हरभा
लाग्निनादग्धःपूर्वंकामःशुचान्वितः ४३ शिवेकृतस्वाघशांत्यैत्रिःपरीत्यध
रामिमाम् क्षेत्रस्यास्यप्रवेशेतुह्यमरोमदनोभवेत् ४४ तस्मात्क्षेत्राद्बहिः

स्थित्वातपस्तीव्रमतप्यत दिव्यवर्षसहस्रंतुलिंगंस्थाप्यविधानतः ४५
ततस्तुष्टोमहादेवोवरयेत्याहतंनृप स्तुत्वातंमन्मथोवव्रेवरानभिमतांस्त
दा ४६ मन्मथउवाच देवानांवचनात्पूर्वंत्वयिद्रोहमकारिषं तद्दोषशांति
र्मेभूयाच्छरीरंचव्रणेप्रभो ४७ क्षेत्रस्यांतःप्रवेशश्चत्वयिभक्तिंचशाश्व
तीम् मृडउवाच वसुदेवगृहेसाक्षाद्भगवान्कमलापतिः ४८ यदावतरणं
कुर्यात्तस्यपुत्रत्वमाप्नुहि गोकर्णेत्वत्प्रवेशार्थंप्रायश्चित्तंकरोम्यहम् ४९ इ
त्युक्त्वाभगवांच्छंभुःस्वकस्यरुजातदा खनितेभूतलेगंगापातालादूर्ध्व
मागता ५० हरउवाच अत्रस्नानंकुरुष्वाद्यसर्वपापाद्विमोक्ष्यसे तच्छ्रु-
त्वास्नानमाधायकामोनिर्मलमानसः ५१ कामउवाच लिंगमेतत्पूजकानां
कामदंस्यात्सदाशिव अघनाशिनीनाम्नेयंनदीनांप्रवराभवेत् ५२ शंक
रउवाच यदुक्तंभवताकामतत्सर्वंभवतिध्रुवम् ब्रह्महागुरुतल्पीवास्व
र्णस्तेयीचमानवः ५३ सुरापानरतोवापिसंयुक्तोह्युपपातकैः स्नात्वात्रपू
ज्यकामेशंसर्वपापैःप्रमुच्यते ५४ इत्युक्त्वाभगवांच्छंभुस्तत्रैवांतरधीयत



कामोगोकर्णमासाद्यकोटितीर्थस्यपूर्वतः ५५ लिंगंस्थाप्यविधानेनपू-
जयित्वाचभक्तितः कृतकृत्यत्वमापन्नोयथाकाममुवासह ५६ शृणुरा
जन्प्रवक्ष्यामिइतिहासंपुरातनम् पुराकलिंगदेशीयोब्राह्मणःशंभुना
मकः ५७ सदादुर्जनसंयुक्तःकामचारीद्विजाधमः विमार्गनिरतोनित्यं
द्यूतचौर्यविशारदः ५८ स्वकर्मस्यपरित्यागीशूद्रवृत्तिरतःसदा कदा
चिदर्धरात्रौचमातृसंगमथाकरोत् ५९ तेनपापेनमहतालोकदूष्योऽभव
न्नृप पश्चात्तापंसमागम्यबभ्रामजगतीतलम् ६० तिरस्कृतश्चसर्वैश्च
मुनिभिर्भावितात्मभिः ततोदुर्वाससंदृष्ट्वाप्रणम्यप्रांजलिर्नृप ६१ प्र
साद्योवाचसोविप्रोदुर्वासास्तपसांनिधिः दुर्वासाउवाच त्वयाकृतस्यपा
पस्यनिष्कृतिर्नास्तिकुत्रचित् ६२ तथापिवक्ष्येपापस्यनिष्कृतिंशृणुभो
द्विज गोकर्णाख्यंमहाक्षेत्रमस्तिपापविनाशनम् ६३ तत्रास्तिसर्वपाप
घ्नीनदीकामाघनाशिनी शिवत्रिशूलजनितामन्मथस्याघशांतये ६४
मात्रासहैवत्वंगच्छतत्रस्थित्वाविधानतः स्नात्वाकामाघनाशिन्यांजप

न्पंचाक्षरींमनुम् ६५ तत्रकामेश्वरंलिंगंपूजयस्वविधानतः इतिदूर्वा
ससोवाक्यंश्रुत्वातंप्रणिपत्यच ६६ कामाघनाशिनींप्राप्यतत्रोवासचिरं
द्विजः स्नात्वाकामाघनाशिन्यांकामेशंपरिपूजयन् ६७ जपन्पंचाक्षरीं
विद्यांद्वादशाब्दमुवासह ततोगोकर्णमासाद्यकोटितीर्थादिषुक्रमात् ६८
स्नात्वासर्वेषुतीर्थेषुतल्लिंगंपरिपूज्यच कृतकृत्यस्ततोभूत्वाततःस्वभवनं
गतः ६९ स्वाचारनिरतःशांतोबभूवद्विजसत्तमः महापातकयुक्तोवासंयु
क्तोप्युपपातकैः ७० स्नात्वाकामाघनाशिन्यांनरोमुच्येतपातकैः सूतउवाच
पौलस्त्यास्तत्र राजेंद्रबहवःसिद्धिमागताः ७१ ततस्तुरावणस्तत्रकुंभक
र्णसमन्वितः विभीषणेनसहितोलिंगानिस्थाप्यतत्रवै ७२ तपस्तेपुर्निरा-
हाराब्रह्मध्यानपरायणाः शिरांसिस्वानिसंछिद्यजुहावदशकंधरः ७३ द
दौतेषांवरान्ब्रह्मायथाभिलषितान्नृप अणिमादिमहासिद्धीरवध्यत्वंच
रावणः ७४ युद्धंसमस्तभूतैस्तुऋतेमानुषमात्रतः कुंभकर्णोमहानिद्रां
कनीयांस्तुविभीषणः ७५ धर्मेरतिंविष्णुभक्तिममरत्वंचलब्धवान् रावणे



नार्चितंलिंगंकुंभकर्णेनपूजितम् ७६ विभीषणेश्वरंलिंगंपूजयंतिनराभु
वि दीर्घायुषोभवंत्यद्धागोकर्णेतद्वनेनृप ७७ श्लेष्मातकमितिश्रेष्ठंसर्वसि
द्धिनिषेवितम् हेतिर्नामप्रहेतिश्चविश्वचित्तिर्विदूरथः ७८ एतेचान्येचबह
वस्तत्रसिद्धिमुपागताः एवंलब्ध्वावरंरक्षोह्यैश्वर्यबलदर्पितं ७९ मातृवा
क्यात्तदायुद्धेजित्वावैश्रवणंनृप अपहृत्यपुरींलंकांविमानमपिपुष्पकं ८०
लंकायांवसतिंचक्रेकुबेरःपितृवाक्यतः गोकर्णक्षेत्रमासाद्यश्लेष्मातकवने
शुभे ८१ लिंगंतत्रप्रतिष्ठाप्यतीर्थंकृत्वातुभक्तितः तपस्तप्त्वाविधानेनप्र
त्यक्षीकृत्यशंकरम् ८२ अलकाख्यांपुरींरम्यांनिधीनष्टौश्रियंतथा उदग्दि
गाधिपत्यंचहरमैत्र्यंतथानृप ८३ लब्ध्वावैश्रवणःपश्चादध्युवासालकांपु
रीम् स्नात्वावैश्रवणीतीर्थेकुबेरेश्वरमर्चयेत् ८४ कार्तिकेतुत्रयोदश्यांत
स्यलक्ष्मीःस्थिराभवेत् ८५ इतिश्रीस्कांदेगोकर्णखंडेगोकर्णमाहात्म्य
सारेनवमोऽध्यायः ९ ॐ ॐ ॐ ॐ
सूतउवाच पुराविवादोह्यभवद्ब्रह्मविष्ण्वोर्नृपोत्तम अहंश्रेष्ठश्चाहमिति

तयोर्युद्धमभूत्तदा १ तत्राद्याविरभूल्लिंगंतत्रशंभुरगात्ततः शिवोप्युवा
चतौदेवौमाभूद्वांकलहोमिथः २ अस्यलिंगस्यमूर्द्धानंपादंवायोऽभिपश्य
ति सश्रेष्ठइतिमन्येऽहंगच्छतंशीघ्रमेवहि ३ इत्युक्तेहंसरूपेणब्रह्माद्रष्टुंशि
रोययौ विष्णुर्वराहरूपोऽधःपादंद्रष्टुमगान्नृप ४ धावन्मूर्ध्वमुखोब्रह्माम
ध्येदृष्ट्वातुकेतकीम् लिंगात्तुंगाद्विगलितांतांकृत्वासाक्षिणींविधिः ५ शिव-
स्यसन्निधिंप्रापविष्णुःकूर्मावधिंगतः लिंगमूलमदृष्ट्वैवहरसंनिधिमाग
मत् ६ तदाशिवेनपृष्टेतुब्रह्माप्रोवाचशंकरम् दृष्टंमयाशिरइतिसाक्षिणी
केतकीत्विह ७ केतक्यपितथेत्याहततोरुद्रःक्रुधान्वितः अशपत्केतकींशं
भुस्त्वयोग्याभवमेऽर्चने ८ ततोऽशपद्विधिंरुद्रोह्यपूज्योभवविरूपे तत
उत्पादयामासकोपादुत्कटभैरवम् ९ उवाचभैरवंशंभुःस्रष्टुरूर्ध्वंशिरोह
र तच्छ्रुत्वाभैरवःशीघ्रंस्रष्टुरूर्ध्वंशिरोहनत् सब्रह्महत्याग्रस्तःसन्बभ्रा
मजगतीतलम् सूतउवाच ततोहरिर्हरंप्राहमयापादौनलोकितौ ११ तच्छ्रु
त्वावचनंरुद्रोलोकपूज्योभवान्भव ततोब्रह्माचिंतयित्वागोकर्णंप्राप्यतत्रहि



१२ शतशृंगगिरौलिंगंतीर्थंकृत्वागिरेरधः तपःकृत्वाचसुचिरंप्रत्यक्षीकृ-
त्यशंकरम् १३ पूजामवाप्यमहतींस्वमूर्तिंस्थाप्यतत्रतु सत्यलोकंययौब्रह्मा
यथाकामंकुरूद्वह १४ ब्रह्मकुंडेनरःस्नात्वाब्रह्मेशंपरिपूज्यच तन्मूर्तिंपूज
येद्राजन्दीर्घायुष्मान्भवेद्ध्रुवम् १५ सूतउवाच केतक्यप्याश्रमंकृत्वाती
र्थंकृत्वातुनिर्मलम् हरंसंतोष्यतपसाभक्त्याचानन्यपूर्वया १६ शिवरात्रौपु
ण्यदिनेपूजायोग्याबभूवसा तद्दिनेतांसमादायविद्वानर्चितियःशिवम् १७
सर्वक्रतुफलंतस्यभवत्येवनसंशयः कूटसाक्ष्यभवंपापंतत्रस्नानाद्विन-
श्यति १८ सूतउवाच भैरवोपिततःप्राप्यगोकर्णक्षेत्रमुत्तमम् तत्राश्रम
पदंकृत्वाचचारसुमहत्तपः १९ घंटाकर्णेनसहितोदिव्यवर्षसहस्रकम्
ततस्तत्तपसाशंभुस्तुष्टआगत्यचाब्रवीत् २० कालभैरवतुष्टोऽस्मिवरंवर
यकांक्षितम् भैरवउवाच ब्रह्महत्यात्वियंदेवबाधतेमांदिवानिशम् २१
तन्मोक्षंमेकुरुविभोयदितुष्टोऽसिशंकर शंकरउवाच मत्प्रसादाद्भैर
वाद्यब्रह्महत्याविनाशिता २२ पातासुकृतिनांत्वंहिशास्तादुष्कृतिनांभव

गो॰मा॰ गच्छशीघ्रंकुरुक्षेत्रंविष्णुर्मोक्ष्यतितत्रतु २३ घंटाकर्णोपिसंप्राप्यक्षेत्रपाल सा॰अ॰
३५ त्वमंजसा तत्रोवासयथाकामंतत्रैवांतर्दधेशिवः २४ ततःसभैरवोराजन् १०
कपालेनसमन्वितः कुरुक्षेत्रंसमागम्यतत्रदृष्ट्वाजनार्दनम् २५ तत्रक्षि
प्त्वाकपालंतुगोकर्णंपुनरागमत् तत्रैववसतिंचक्रेघंटाकर्णेनसंयुतः २६
शिक्षकःपापिनांनित्यंरक्षन्सुकृतिशीलिनां सूतउवाच हरनेत्राग्निनाद
ग्धेमन्मथेमुनयोनृप २७ शिवस्यनिकटंगत्वामदनंदेहिचाब्रुवन् हरउवाच
इतःपरंनतस्यांगंकिंतुजन्माभविष्यति २८ वैवस्वतेंऽतरेविप्राः कृष्णेपुत्र
त्वमाप्नुयात् इत्युक्तेशंभुनाकामस्तस्यन्वेतस्यभून्नृप २९ पार्वतीमीक्ष
यांचक्रेललाटात्तेजआपतत् स्वस्याकृतिःकुमारोऽभूद्गौर्यैतंप्रददौशिवः
३० विनायकाख्यांगमितःकदाचित्पार्वतीनृप तंदृष्ट्वातनयंदेवीतंभर्तारमभ
न्यत ३१ ततोज्ञात्वात्मजंक्रोधाद्दशपंक्तिकृतोभव गजाननोदशभुजःखर्व
पादांबुजद्वयः ३२ लंबोदरःशूर्पकर्णःसोऽभून्मातुश्चशापतः शंकरःस्वात्म ३५
जंदृष्ट्वापृष्टःकइतिपार्वतीम् ३३ विनायकस्तवसुतइतिसर्वंजगादह शिवः

स्वपुत्रमादायइदंवचनमब्रवीत् ३४ मातृशापात्तुवैरूप्यंतवमाभूद्गजानन इ
दमेवयथाभूयात्पुनःसौरूप्यमात्मनः ३५ तथागोकर्णमासाद्यतपःकुरुवि
नायक श्रुत्वागोकर्णमासाद्यतीर्थंकृत्वासुनिर्मलम् ३६ तपश्चचारसुचिरं
प्रसन्नोऽभून्महेश्वरः देवैर्ब्रह्मादिभिःसार्धंवरंब्रूहीत्यभाषत ३७ विनायक
उवाच मातृशापविमोक्षंचदेहिमेपरमेश्वर शिवउवाच वैरूप्यंतवसौरू-
प्यंभवत्वेवगजानन ३८ गणानामधिपश्चैवविघ्नानामधिपोभव ततोदेवाः
स्वायुधानिददुस्तस्मैमुदान्विताः ३९ विष्णुःस्वतनयांशक्तिंददौतस्मैनराधि
प इतिदत्वावरंतस्मैरुद्राद्यादेवतागणाः ४० विनायकेनसहितास्तत्रैवांतर्दधुः
सुराः तीर्थेवैनायकेस्नात्वागणानांत्वेतिमंत्रतः ४१ पूजयेच्चगणाध्यक्षंसर्वा-
न्कामानवाप्नुयात् सूतउवाच हिरण्यकशिपोःपुत्रःप्रल्हादाख्योमहासुरः
४२ पितृद्रोहंसमासाद्यततोनारदवाक्यतः गोकर्णक्षेत्रमासाद्यकोटितीर्थ
स्यदक्षिणे ४३ नृसिंहंस्थाप्यतत्रैवतपस्तेपेयतात्मवान् ततःप्रसन्नोभगवा
न्नरसिंहःसमागमत् ४५ त्वंवरंवरयेत्याहप्रल्हादोवाक्यमब्रवीत् मयाकृ

गो॰मा॰ तःपितृद्रोहस्तन्मोक्षंमेप्रसादय ४५ श्रीभगवानुवाच पितृद्रोहाद्विमु सा॰अ॰
३६ क्तस्त्वंलोकपूज्योभवाधुना वैशाखेशुक्लभूतायांमांपूजयतियोनरः ४६ पि १०
तृद्रोहादिकंपापंविलयंयातितत्क्षणात् इत्युक्त्वानृहरिस्तत्रतस्यांमूर्तौ-
व्यलीयत ४७ इतिलब्ध्वावरंसोपिप्रल्हादःस्वपुरंययौ सूतउवाच उषा
बाणासुरसुताकृष्णपौत्रंजहारच ४८ अदृष्ट्वास्वस्यपौत्रंतुकृष्णश्चिंतापरो
ऽभवत् ततोनारदवाक्येनगोकर्णक्षेत्रमागमत् ४९ सस्नात्वाकोटितीर्थेतु
पूजयित्वामहाबलम् वार्षिकांश्चतुरोमासांश्चचारसुमहत्तपः ५० शिवःप्रत्य
क्षतांप्राप्यउवाचमधुसूदनम् कृष्णविष्णोमहाबाहोमांजित्वासमरेध्रुवम्
५१ बाणस्यदर्पहननंकृत्वाप्नुहिस्वपौत्रकम् इत्युक्त्वांतर्दधेशंभुःकृष्णोद्वा
रवतींययौ ५२ बाणासुरंविजित्वातुस्वपौत्रंलब्धवान्नृप कृष्णंसंपूज्यगो
कर्णेसर्वान्कामानवाप्नुयात् ५३ सूतउवाच दुर्वासावैमुनिश्रेष्ठोदत्तात्रेयेण
संयुतः तपःकृत्वातुगोकर्णेयोगसिद्धोबभूवह ५४ सूतउवाच तमोसुरे ३६
णापहृतावेदाःशास्त्राणिपार्थिव गोकर्णक्षेत्रमासाद्यलिंगंस्थाप्यपृथक्पृ

थक् ५५ तपश्चक्रुश्चनियताःप्रसन्नोविष्णुरब्रवीत् तुष्टोऽस्मिनितरांवे
दाःशास्त्राणितपसाचवः ५६ वेदशास्त्राण्यूचुः शंखासुरेणापहृतावयंसर्वे
जनार्दन अस्मानुद्धरलिंगानिलोकेपूज्यानिसंतुवै ५७ श्रीभगवानुवाच
व्यासावतारंकृत्वाहंतीर्थयात्रापदेशतः अत्रागत्यतपःकृत्वाह्युद्धरिष्यामि
वैध्रुवम् ५८ येपूजयंतिलिंगानिवेदशास्त्रयुतानिभुवि सप्तजन्मभवेयुर्वैत
दंतेमोक्षमाप्नुयुः ५९ इतितेभ्योवरंदत्वातत्रैवांतर्दधेहरिः व्यासःपराशर
सुतस्तीर्थयात्राक्रमाच्चरन् ६० गोकर्णक्षेत्रमासाद्यतपस्तेपेयतात्मवान् शु
कमुत्पादयामासतथापितपआचरत् ६१ एवंतपस्यतस्तस्यप्रसन्नोभून्म
हेश्वरः उवाचव्यासंनृपतेव्यासतेह्याश्रमश्शुभः ६२ तमोसुरेणपापेन
वेदाःशास्त्राणिखंडिताः विभागयस्वतान्सर्वानध्येयीरन्द्विजाभुवि ६३
इत्युक्त्वांतर्हितःशंभुर्व्यासस्तुतदनंतरम् वेदाञ्छास्त्राणिचतदाविभागं
कृतवान्नृप ६४ शुकोपितपआस्थाययोगसिद्धिमवाप्तवान् सूतउवाच
विश्वकर्मातपस्तप्त्वागोकर्णेलिंगमुत्तमम् ६५ पूजयित्वाविधानेनब्रह्माणं

पर्यतोषयत् प्रसादाद्ब्रह्मणोराजन्मनःशिल्पंसलब्धवान् ६६ सूतउवाच
गौतमेनपुराशक्रः शप्तोभूत्कामलोलुपः लिंगंस्थाप्यतुगोकर्णेतपआधा
यभक्तितः ६७ परितोष्यमहेशानंतपसासिद्धिमाप्तवान् गौतमोपिमु
निश्रेष्ठस्त्यक्त्वाहल्यांततोवने ६८ भुवःप्रदक्षिणंकुर्वन्गोकर्णक्षेत्रमागमत्
लिंगंतत्रप्रतिष्ठाप्यतपसासिद्धिमाप्तवान् ६९ तृणाग्निरपिविप्रेंद्रस्तपसा
सिद्धिमाप्तवान् काश्यपोपिमुनिश्रेष्ठःकपोताख्योमहामुनिः ७० सुर
सानागमाताचकेसरीहनुमत्पिता विश्वेदेवाश्चवसवोग्रहेंद्राश्चभृगुर्मु
निः ७१ जमदग्निःक्रतुश्चैवतथैवाप्सरसांगणः शतशृंगेतपःकृत्वासिद्धिं
प्राप्ताःपुरानृप ७२ अत्रेरंगिरसश्चैवतथाभौमस्यचाश्रमः एतेषामाश्र
मःपुण्यस्तीर्थंचैवयथाक्रमम् ७३ दर्शनादेवपापानिज्ञानाज्ञानकृतानिच
नश्यंत्येवनसदेहोनृणांभरतसत्तम ७४ विश्वावसोस्तुंबुरोश्चचित्रसेन-
स्यपार्थिव गंधर्वाणांतथान्येषांसिद्धानांमरुतामपि ७५ किन्नराणांच ३७
साध्यानांगुह्यकानांचरक्षसाम् विद्याधराणांराजेंद्रकिंपुरुषाणांतथैवच

७६ आश्रमाश्चबहून्यत्रतीर्थानिनृपसत्तम वाल्मीकिरपिविप्रेंद्रतपःकृ
त्वाविधानतः ७७ सिद्धिंप्राप्यमहादेवाद्यथाकाममतिष्ठत हनुमांस्तत्ररा
जेंद्रवायुपुत्रोमहाबलः ७८ तपश्चचारसुचिरंघोरमुद्दिश्यशंकरं तपसा
तस्यवीरस्यशिवःप्रत्यक्षतांगतः ७९ शिवउवाच तुष्टोऽस्मितेहरिवरत
पसाकिमभीप्सितम् हनूमानुवाच युध्यमानस्यमेदेवजयोभवतुसर्व-
दा ८० तथास्त्वितिवरंदत्वातत्रैवांतर्दधेहरः हनूमेशंपूजयित्वासर्वशत्रु
जयंलभेत् ८१ सूतउवाच आर्याशृंगात्समागम्यदुर्गादेवीनृपोत्तम दुर्गा
कुंडमितिख्यातंतीर्थंकृत्वास्वनिर्मलम् ८२ तपःकृत्वातुनियतासिद्धिमाप
स्वदुर्लभाम् शुंभादिराक्षसान्हत्वामहाकालीनृपोत्तम ८३ स्वायुधानि
चसंक्षाल्यशतशृंगतटेशुभे तपसेकृतसंकल्पाआस्तेसादक्षिणामुखा
८४ आयुधानिक्षालितानियत्रतत्तीर्थमुत्तमम् तत्कालीह्रदमाख्यातं
तंदृष्ट्वापूजयेन्नृप ८५ महाकालींसमभ्यर्च्यसर्वान्कामानवाप्नुयात् गो
कर्णक्षेत्ररक्षार्थंनियुक्ताशंभुनाहिसा ८६ सूतउवाच अग्निवंशोद्भवा-

विप्राश्चत्वारोबिंदुनामकाः अदृश्याः सर्वभूतानांदुर्गदेशंसमाश्रिताः ८७
तपस्तप्त्वातुनियतंकाष्ठभूतावनेऽवसन् देवानांवचनाच्छंभुस्तेषांप्रत्यक्ष
तांगतः ८८ काष्ठभूतान्समालोक्यचंद्रोऽमृतमसिंचत् शंकरउवाच सु
धाभिरमृतंपीत्वासिद्धिंप्राप्ताः सुदुर्लभाम् ८९ अधिगम्यपरंब्रह्मब्रह्मभूता
श्चरिष्यथ तीर्थानिवोमहाभागाः सर्वपापहराणिवै ९० आस्वर्लोकाद्द्विज
श्रेष्ठाः पातालावधिसत्तमाः धाराश्चांबुस्तु नित्यावैसंतुपापहराभुवि ९१ इ
तिदत्वावरंशंभुस्तत्रैवांतर्दधेहरः धर्मराजानुजोभीमस्तीर्थयात्रापदेशतः
९२ मातरंस्वांसमादायगोकर्णक्षेत्रमागमत् तदातत्रत्यऋषिभिर्बाधितोऽग
त्स्तदंतिकम् ९३ पाषाणेनावृतंदृष्ट्वातीर्थंतद्देशबिंदुकम् गदयाताडयामा
सपाषाणंमार्गमातनोत् ९४ तदाभीमगदातीर्थमितिख्यातमभूत्ततः ९५
इतिश्रीस्कांदेगोकर्णखंडेगोकर्णमाहात्म्येदशमोऽध्यायः १० छ
सूतउवाच रुद्रपादस्यमाहात्म्यंवक्ष्यामिशृणुपार्थिव मथुरायांद्विजः क
श्चित्सुहोत्रइतिविश्रुतः १ ब्रह्मक्षत्रविशःशूद्रान्याजयन्परवंचकः महादान



ग्रहीपर्वकालेदुष्टप्रतिग्रही २ चंद्रसूर्यग्रहेपितृश्राद्धेदानग्रहीसदा लिंगा
र्चनादिनकृतंतथामासव्रतादिकम् ३ नव्ययंकृतवान्सोपिदेशाद्देशंव्रजन्नपि
द्रव्यन्यासायसययावेकदासह्यकानने ४ दृष्ट्वा तुच्छ्रितंतत्रनिष्पत्रंशा-
ल्मलीतरुम् तच्छाखालंबमानांश्चऊर्ध्वपादानतिकृशान् ५ भयानकानू
र्ध्वरोम्णः शुष्ककंठौष्ठतालुकान् क्रंदमानान्सदृष्ट्वातुवेगेनमहतापयौ ६
धावमानंसमालोक्यज्ञातातंचस्ववंशजम् आहूयतंपिशाचास्तेप्रोचुःप्री-
तियुतंवचः ७ पिशाचाऊचुः सुहोत्रागच्छभद्रंतेमाभैषीःपुत्रसांप्रतम्
पालयास्मान्पितॄंस्त्वंऽद्यप्राप्तेनेनतुकर्मणा ८ त्वयाकृतेनपापेनपैशाचींयो
निमागतान् पतमानांस्तुनरकेत्वमुद्धर्तुमिहार्हसि ९ स्वपितॄणांवचःश्रुत्वा
सुहोत्रोऽतीवविह्वलः साष्टांगंप्रणिपत्याहह्यात्मानंनिंदयन्बहु १० अपराधः
कृतोयोवैतंक्षंतव्यंहिसांप्रतम् केनपुण्येनभवतांस्वर्गलोकोभवेद्ध्रुवम् ११
पितरऊचुः शृणुपुत्रमहत्पुण्यंगोकर्णंगच्छसांप्रतम् रुद्रपादंनामसुतव
र्ततेतच्छिलातले १२ पुरामित्रसहोराजारक्षोऽभूद्गुरुशापतः भक्षयामास

सततोवसिष्ठस्यात्मजाञ्छतान् १३ दुर्मुखत्वंतदाप्राप्तावसिष्ठस्यसुतास्त
तः वसिष्ठेनसमाज्ञप्तश्शक्तिपुत्रःपराशरः १४ गोकर्णक्षेत्रमासाद्यगत्वा
रुद्रपदंशुभम् चक्रेश्राद्धंविधानेनपिंडंदत्वातिलोदकम् १५ ततःशक्त्या
दयःसर्वेब्रह्मलोकंययुःसुत तस्मात्त्वमपिवैगत्वारुद्रपदंशुभम् १६
तत्रादंसम्यगभ्यर्च्यश्राद्धंकुरुविधानतः दानंवित्तानुसारेणयावच्छंभुःप्र-
सीदति १७ इतिश्रुत्वापितृवाक्यंरुद्रपादंततोऽगमत् नित्यंसमुद्रेस्नात्वातु
श्राद्धंकुर्वन्समाहितः १८ तपश्चचारस्वचिरंकुर्वन्दानानिपार्थिव स्वयंभु
जन्हविष्यान्नंपितॄणांमुक्तयेनृप १९ ततोबहुतिथेकालेशिवःप्रत्यक्षतांगतः
शिवउवाच तुष्टोऽस्मिनितरांब्रह्मन्वरंवरययत्कांक्षितम् २० सुहोत्रउवाच य
दितुष्टोऽसिदेवेशपितॄणांमुक्तिदोभव शिवउवाच पितॄणांतववैप्रेंद्रस्वर्ग
लोकोभवेद्ध्रुवम् २१ कन्यामासेतुकुतुपेअत्रागत्यनरोत्तमः श्राद्धंकुर्वन्रुद्र
पादेउद्धरेत्स्वपितॄन्स्वयम् २२ ममलोकंसमासाद्यअमृतत्वंसगच्छति इ
त्युक्त्वाब्राह्मणंराजंस्तत्रैवांतर्दधेशिवः २३ ततस्तत्पितरोजग्मुर्ब्रह्मलोकंमु ३९
दान्विताः सुहोत्रोपिद्विजश्रेष्ठोदेहांतेस्वर्गतिंययौ २४ सूतउवाच धर्मेण
निर्जितोऽधर्मोधर्मजेभ्यइतिध्रुवम् गोकर्णक्षेत्रमासाद्यतपस्तप्त्वासमाहि
तः २५ प्रसन्नीकृत्यदेवेशंवरंलब्ध्वामहेश्वरात् कलौयुगेह्यधर्मस्तुधर्मं
जिग्येनृपोत्तम २६ कार्तिक्यांसोमवारेतुतीर्थेस्नात्वासमाहितः अधर्मनाम्न
यात्कोपिअग्निष्टोमफलंलभेत् २७ सूतउवाच असूयामत्सरीचंडीक्रोधा
द्वेषाक्षमातथा ईर्ष्यालक्ष्मीश्चघोराचमोहनाचनृपोत्तम २८ निर्जिताधर्मपु
त्रैस्तैःसत्याद्यैर्दुःखिताभृशम् गोकर्णक्षेत्रमासाद्यतपस्तप्त्वायथाविधि २९
प्रसन्नीकृत्यविश्वेशंसंप्राप्तेह्यंतिमेयुगे धर्मस्यतनयान्हत्वास्वयंचबलि
नोऽभवन् ३० तीर्थेषुतेषुस्नातानांतत्तज्जातंभयंनहि सूतउवाच क्ष
मासत्यंदमःकीर्तिरहिंसानंदएवच ३१ बुद्धिर्मानस्तथाराजन्लक्ष्मीर्लज्जाधृ
तिःस्मृतिः तथामेधाऽधर्मसुतैरसूयाद्यैःपराजिताः ३२ ब्रह्मणोवचनाद्राज
न्गोकर्णक्षेत्रमागमन् शाल्मलिन्यास्तटेरम्येतपस्तप्त्वाचिरंनृप ३३ प्रसन्नी
कृत्यदेवेशंवरंलब्ध्वासुदुर्लभम् अधर्मतनयाञ्जित्वास्वयंचबलिनोऽभव

नू ३४ तीर्थेषुतेषुस्नातानांगुणस्तेषांभवेद्ध्रुवम् सूतउवाच विंध्येननिर्जितो
मेरुःपुत्राभ्यांसहदुःखितः ३५ गोकर्णक्षेत्रमासाद्यतपस्तप्त्वातिदारुणम्
प्रत्यक्षीकृत्यदेवेशंवरंप्राप्यमनोगतम् ३६ मेरुंविजित्यस्वस्थोभूत्पुत्राभ्यां
सहपार्थिव रम्योरमणकश्चैवमेरुपुत्रौनृपोत्तम ३७ सूतउवाच कृतत्रेतौ
द्वापरश्चकलिश्चेतिचतुर्युगाः गोकर्णक्षेत्रमासाद्यसिद्धिंप्राप्तामहेश्वरात् ३८
तीर्थेषुतेषुस्नातानांस्वर्गलोकोभवेद्ध्रुवम् सूतउवाच दिशश्चापितपस्तप्त्वा
सिद्धास्तत्रकुरूद्वह ३९ गालवश्चकहोळश्चतपस्तप्त्वातिदारुणम् भ-
क्त्याशिवंसमासाद्यसिद्धिंप्राप्तौद्विजोत्तमौ ४० कनकारव्योराजपुत्रस्तत्रसं
पूज्यशंकरम् पित्रात्यक्तंस्वकंराज्यंप्राप्तःशंभोरनुग्रहात् ४१ कषश्चरोम
शश्चैवपरांसिद्धिमुपागतौ सूतउवाच शृणुराजन्प्रवक्ष्यामिशालूकिन्याः
कथांशुभाम् ४२ पुराभगीरथोराजागंगामाहृतवान्दिवः मार्गेतुजन्हुना
पीतासेवयित्वातुतंमुनिम् ४३ तस्मादानीयगंगांतुपातालेभस्मशेषितान्
उद्धारयामासपितॄन्ससमुद्रंप्रविवेशसा ४४ मुनिःसत्यतपानामजन्होराश्र



ममागमत् पूजयामासतंजन्हुःपृष्टःक्षेमादिकंनृप ४५ सत्यतपाउवाच पु
ष्पभद्रानदीतीरेस्थितोऽहंजान्हवींगतः तत्रस्नात्वात्विहायातःशृणुष्वेदंवचो
मम ४६ त्वयापीताहिगंगेतिलोकवादोऽभवन्मुने कश्यपाद्यैर्मुनिवरैर्गदितं
तत्रवैश्रुतम् ४७ तद्वाददोषशांत्यर्थंगच्छगोकर्णमद्यवै तत्रशालूकिनीना
मतत्राप्यास्तेमलापहा ४८ तत्तीरस्थाप्यगंगायामूर्तिंपूजयनित्यशः ए
वंकृतेलोकवादोनश्यत्येवनसंशयः ४९ तत्रस्नात्वापुराजन्होब्राह्मणौकूट
साक्षिणौ रोमपादपृथुग्रीवौमुक्तौस्वकृतपातकात् ५० जन्हुरुवाच किं
कारणंकूटसाक्ष्यमूचतुस्तौमहामुने शालूकिन्यांकथंस्नातौविमुक्तौकुत्र
संस्थितौ ५१ शालूकिन्यास्तथोत्पत्तिंनामधेयंचशंसमे सत्यतपाउवाच
रोमपादपृथुग्रीवौमत्समीपेस्थितावुभौ ५२ वेदाभ्यासंप्रकुर्वंतौब्रह्मचर्यप
रायणौ कदाचिद्भृगुवंश्यश्चकंडुर्नामागतश्चमाम् ५३ वेदमभ्यस्तवान्सो
पिमत्सेवातत्परोह्यभूत् एकदारोपृथुग्रीवोह्युवाचशृणुमेवचः ५४ कंडु
नावैसुरापीतागुरोरदृष्टानसंशयः रोमपादेनतत्सर्वमुक्तंतस्मिन्विचार्य

ताम् ५५ तच्छ्रुत्वारोमपादाख्यमाहूयपरिपृष्टवान् सोपितथ्यमितिप्रा
हततोऽहंकुपितोभृशम् ५६ कंडोमद्वनाच्छीघ्रंयाहित्वंब्राह्मणाधम इ
त्युक्तेसोपिसाष्टांगंप्रणिपत्याब्रवीच्चमाम् ५७ दुर्वारसंनित्यमेवपास्यामि
पितृवाक्यतः इत्युक्तेतुकुलात्सोपिबहिष्कार्यइतीरितः ५८ एतस्मिन्नंतरे
कालेवागुवाचाशरीरिणी निष्पापोऽयंसत्यतपाःशिष्यस्तेभृगुनंदन ५९
पृथुग्रीवेणमात्सर्याद्रोमपादेनवैतथा अपवादंकूटसाक्ष्यमुक्तंचनविचारतः
६० तस्मात्त्वमपिविप्रर्षेकिंचिद्दुष्कृतवानभूः एतत्पापविशुद्ध्यर्थंगच्छ
गोकर्णमघवै ६१ तत्राश्रमपदंकृत्वातपःकुरुविधानतः महादेवप्रसादे
नतवदोषोविनश्यति ६२ रोमपादस्यकंडोश्चपृथुग्रीवस्यवैतथा इत्यु-
क्त्वामांनभोवाणीविररामद्विजोत्तम ६३ ततःशिष्यैःससंगत्वागोकर्णमह
मादरात् तस्यक्षेत्रस्यसीमायांस्थित्वाहमचरंतपः ६४ आविर्बभूवपुरतो
ह्यस्माकंपरमेश्वरः स्तुतोऽथबहुभिःस्तोत्रैःस्वकपर्दाज्जहौतदा ६५ गं 
गांत्रैलोक्यजननींनदीभूत्वातुसागता समुद्रंप्राविशच्छीघ्रमथोवाचसदा

शिवः ६६ एषानदीपुण्यतमाशाल्मलीनामनामतः महापातकिनोयेचकूट
शाल्मलिसंस्थिताः ६७ तेषांपुत्रायदिस्नायुःपितृनुद्दिश्यभक्तितः सर्वपाप
विनिर्मुक्ताःप्राप्नुयुःपरमांगतिम् ६८ तस्माच्छालूकिनीनाम्नावदिष्यंति
जनाभुवि इत्युक्त्वाभगवाञ्छंभुस्तत्रैवांतरधीयत ६९ ततोऽहंशिष्यस
हितःस्नात्वानद्यांसमाहितः गोकर्णेषुचतीर्थेषुस्नात्वापूज्यमहाबलम् ७०
यथास्थानंगतोऽहंवैतस्मात्त्वंद्विजपुंगव स्नानंकृत्वातुगंगायांस्नात्वापूज्य
महाबलम् ७१ एवमुक्त्वासत्यतपाजन्हुंस्वैरगतिर्ययौ ततोजन्हुस्तुगोकर्णे
शाल्मलीतीरमागमत् ७२ शाल्मल्यांस्नानमाधाय गंगामूर्तिमपूजयत्
एवंपूजयतस्तस्यगंगाप्रत्यक्षतांगता ७३ वरंवरयभद्रंतेतुष्टास्मीत्याहतंनृप
जन्हुरुवाच कृतोमयापराधस्तेगंगेऽज्ञानाच्चमोहतः ७४ तत्पापंशमया
द्यत्वंवरमेतंवृणोम्यहम् गंगोवाच जन्होनास्तित्वयिद्रोहोमत्प्रसादान्न
संशयः ७५ आश्वयुज्यसितेपक्षेह्यष्टम्यामरुणोदये नदीनदैःसर्वतीर्थैः
सिद्धैःसुरगणैःसह ७६ आविर्भवाम्यत्रनद्यांसर्वपापहरान्नृणाम् तस्माद्द

गावलीनाम्नानदीख्याताभविष्यति ७७ तस्मिन्कालेऽत्रयः स्नात्वामन्मूर्तिंपू
जयेन्मुने स्तोत्रेणत्वत्कृतेनैवममनामसहस्रकैः ७८ इहदत्वा सर्वभोगां
स्तस्मैदास्यामिमत्पदम् एवमुक्त्वानदीगंगातत्रैवांतरधीयत ७९ एवंल
ब्ध्वावरंजन्हुः कोटितीर्थादिकंनृप स्नात्वातत्रत्यतीर्थेषुस्वाश्रमंपुनराय-
यौ ८० सूतउवाच पुराहिडिंबभगिनीहिडिंबीनामराक्षसी गोकर्णेत
पआधायभर्तृद्रोहोद्भवादिकात् ८१ पापाद्विमुक्ताव्यासोन्त्यात्वाश्रमः
सर्वमुक्तिदः सूतउवाच वाजिमेधशतंकृत्वानहुषोनृपसत्तम ८२ प्रा
प्यशक्रपदंराजाच्युतोऽगस्त्यावमानतः व्यालोभूत्वाततोमुक्तोगोकर्णे
तपआचरत् ८३ ततोरुद्रप्रसादेनपुनःस्वर्गमवाप्तवान् सूतउवाच अं
बरीषोनलोराजानिमिर्नाभागएवच ८४ इक्ष्वाकुश्चययातिश्चबाणोनाम
महासुरः एतेचान्येसबहवस्तपसासिद्धिमागताः ८५ इतिश्रीस्कांदेगो
कर्णखंडेगोकर्णमाहात्म्यएकादशोऽध्यायः ११ छ छ



सूतउवाच पुराकैलासशिखरेसमासीनोवृषध्वजः पृष्टःप्रोवाचपार्वत्यै
स्कंदायपरमेश्वरः १ गोकर्णक्षेत्रमाहात्म्यंप्रमथास्तत्रशुश्रुवुः ततःसिद्धो
मणिभद्रोभूतनाथश्चभारत २ नमस्कृत्वाहरंप्रोचुस्तत्क्षेत्रस्यचदर्शनम्
यात्रांकृत्वाविधानेनक्षिप्रंयास्यामतेऽतिकम् ३ रुद्रउवाच शीघ्रंगच्छत
गोकर्णंदृष्ट्वायातमदंतिकम् शंभुनातेह्यनुज्ञाताययुर्गोकर्णमंजसा ४
सर्वदेवात्मकंमत्वागोकर्णंतेकुरूद्वह प्राच्यांतत्क्षेत्रसीमायांकृत्वाश्रमपदं
शुभम् ५ सिद्धस्तपश्चरन्नासीत्ध्यायन्विश्वेश्वरंहरम् प्रसन्नचेतासोप्या
हवरंब्रूहीतितंहरः ६ सिद्धउवाच स्थित्वाक्षेत्रेत्तवविभोत्वत्सेवांकर्तुमुत्सहे
शंकरउवाच अत्रैववससिद्धत्वंरक्षप्राचींदिशंसदा ७ सिद्धकुंडमितिख्या
तमष्टसिद्धिप्रदंनृणाम् इतिदत्वावरंतस्मैतस्मिन्लिंगेऽवसत्ततः ८ मणिभ
द्रोपिराजेंद्रसिरसाभूमिमस्पृशन् ऊर्ध्वपादोनिरालंबश्चचारसुचिरंतपः
९ शतशृंगतटेरम्येध्यायन्शिवपदांबुजम् ततोरुद्रोप्युवाचेदंवरंवरय-
कांक्षितम् १० मणिभद्रउवाच अत्रैववस्तुमिच्छामिक्षेत्रेऽस्मिंस्तवशंक
र शंकरउवाच अत्रैववसभद्रत्वंप्रतीचींसीम्निरक्षकः ११ इतिदत्वा

वरंतस्यतत्रैवांतर्दधेहरः भूतनाथस्तपस्तस्त्वाप्रत्यक्षीकृत्यशंकरम् १२
तस्मात्सिद्धिमनुप्राप्यतत्रोवासयथासुखम् गोकर्णंरक्षमाणास्तेतत्रस्था
सन्गणान्विताः १३ सूतउवाच ततोगोकर्णमाहात्म्यंश्रुत्वादेवीमुदान्विता
उवाचदेवीभर्तारंतत्क्षेत्रंदर्शयस्वमे १४ तच्छ्रुत्वावचनंदेव्याःशंकरःप्रमथैः
सह वृषारूढःसचययौगोकर्णंसिद्धसेवितम् १५ दर्शयामासपार्वत्यैदृष्ट्वा
साविस्मयंययौ पार्वत्युवाच वस्तुमिच्छाम्यहंचात्रक्षेत्रेऽस्मिन्शंकराधु
ना १६ इत्युक्तेप्रिययासार्धमुवासपरमेश्वरः उमावनमितिख्यातस्त्वा
श्रमस्सोप्यभून्महान् १७ तदाश्रमःपुण्यतमोगोकर्णेभरतर्षभ शि
लातुकुंडिकाकारासमुद्रोपरिवर्तते १८ दर्शनादेवतस्यास्तुसर्वपापंव्यपो
हति पृथिव्यांयानितीर्थानियानिस्वर्गेवसंतिच १९ तानिसर्वाणिशक्रस्य
र्थंदेव्यास्तत्रगतानिवै तेषांह्रदादभूत्तीर्थमुमाह्रदमितिप्रभो २० उ
मामहेश्वरंनामस्थापितंलिंगमुत्तमम् तत्तीर्थेतुनरःस्नात्वातल्लिंगंप
रिपूजयेत् २१ सर्वान्कामानवाप्नोतिसर्वपापैःप्रमुच्यते तस्मिन्वनेक ४३

ल्पतरुश्छायापादपनामकः २२ सदापुष्पफलोपेतःसप्तहस्तोच्छ्रितश्वसः
मृत्युंजयंतितंप्राप्यजंतवोनात्रसंशयः २३ क्रीडागिरेरधोभागेमालिनीना
मनिम्नगा आस्तेपुण्योदकाराजन्नृणांपुण्यविवर्धिनी २४ स्वायंभुवे
ऽतरेचासीच्चंद्रदेवइतिश्रुतः मालिनीनामतस्यासीद्भार्यापरमशोभना
२५ तयासार्धंनृपवरःसिद्धिमिच्छंस्तपश्चरन् क्रीडाशैलादधोभागेहर
माराधयन्स्वयम् २६ ततःप्रसन्नोभगवानुमयासहितःशिवः शंकरउ
वाच तुष्टोऽस्मितपसातेऽद्यसपत्नीकस्यपार्थिव २७ वरंवरयभोराजन्नि
त्युक्तेशंभुनाब्रवीत् चंद्रदेवउवाच त्वयिसायुज्यमिच्छामितद्देहिभग
वन्मम २८ मालिनीचापिपार्वत्यांवव्रेसायुज्यमंजसा तथास्त्वितिहरःप्रो
चेदेवौतावपिपार्थिव २९ वायुभूतौविविशतुर्देवंदेवींकुरूद्वह चंद्रदेवा
श्रमोनामख्यातोमुक्तिप्रदोनृणाम् ३० कामार्तौनितरांदेवौतत्रक्रीडांप्र-
चक्रतुः सुचिरंराजशार्दूलयथाकामंयथासुखम् ३१ तयोःसंभोगजनि
तारुक्षीभूतामहानदी शुद्धस्फटिकसंकाशानिर्मलापापहारिणी ३२

गा॰मा॰ मालिनीनामविख्यातानदीसर्वरसान्विता द्वादशेद्वादशेवर्षेफाल्गुनेमासि सा॰अ॰
४४ दृश्यते ३३ फाल्गुनर्क्षेकृतस्नास्तांनपश्यंतिकुरूद्वह तस्मिन्कालेनरोयस्तु १२
तत्रस्नानंकरोतिच ३४ सोऽमरत्वमवाप्नोतिसत्यंसत्यंमयोदितम् सूतउवाच
पुराव्याधस्तुदुष्टात्मासह्याद्रिशिखरेनृप ३५ दुर्मुखोनामतत्रास्तेनिर्घृणः
पापचेतनः पशुपक्षिद्विजान्हंतिमांसगृध्नुर्दुरात्मवान् ३६ सकुटुंबाहता
विप्राहतागावःसवत्सकाः तद्भीत्यासर्वभूतानितंदेशंनोपचक्रमुः ३७ ए
वंकालोमहान्राजन्नत्यगात्तस्यदुर्मतेः ततोऽभ्यगात्कौशिकाख्यस्तीर्थसे
वीद्विजोत्तमः ३८ गोकर्णस्थानितीर्थानिस्नात्वास्थाप्यकमंडलौ सह्याद्रि
मगमत्सोपितंदृष्ट्वाभ्यद्रवत्खलः ३९ गृहीत्वाखड्गचर्मेचतिष्ठतिष्ठेतिचा
ब्रवीत् तमापतंतमालोक्यकौशिकोभयविह्वलः ४० तस्योपरिविचि
क्षेपभ्रामयित्वाकमंडलुम् भग्नंसहस्रधातच्चस्पृष्टमात्रांभसानृप ४१ पा
पहानिरभूत्तस्यलुब्धकस्यदुरात्मनः दैववानभवत्सद्यस्त्यक्त्वास्वाभा ४४
विकींमतिम् ४२ निरस्यचर्मखड्गंचप्रतिजज्ञेतदाचसः अद्यप्रभृतिभू

तानांस्वस्त्यस्त्वभयदोऽस्म्यहम् ४३ मत्तस्तवभयंमास्तुना
तोद्विज इत्युक्त्वालुब्धकोराजन्ननामद्विजपादयोः ४४ उत्थाय
त्वाइदंवचनमब्रवीत् पापोऽहंपापकर्माहंमामुद्धरनमोऽस्तुते ४५
ब्राह्मणस्त्वंवैदृष्ट्वाभयमपास्यच उवाचमधुरंविप्रःकिमिदंतवचेष्टितम्
तच्छ्रुत्वालुब्धकःप्राहप्रसादंकुरुभोमयि मयाबहूनिपापानिकृतानिद्विज
पुंगव ४७ त्वांदृष्ट्वाहंहंतुमगांभयात्त्वंक्षिप्तवानभूः मंत्रपूतंजलंविप्रपा
पहानिरभूत्ततः ४८ तपश्चरितुमिच्छामिउपदेशंकुरुप्रभो इतितद्वच-
नंश्रुत्वाकौशिकोब्राह्मणोऽब्रवीत् ४९ यद्येवंनिश्चितंवीरत्वयाद्यव्याध
सत्तम व्रतंनिरशनंकृत्वागोकर्णेयाहिसांप्रतम् ५० तत्राश्रमपदंकृत्वाय
जविश्वेश्वरंहरम् यावज्जीवंमहाबाहोह्यंतेस्वर्गमवाप्स्यसि ५१ एवमु-
क्त्वाततोविप्रोयथाकामंजगामह व्याधस्त्वस्यक्तातुतत्सर्वंगोकर्णेप्रतिज
ग्मिवान् ५२ वृक्षमूलमुपाश्रित्यनिराहारोऽचरत्तपः शिवसंकीर्तनात्त
स्यपापहानिरजायत ५३ ततःपंचत्वमापन्नोगोकर्णेभरतर्षभ तेनप

ण्येनमहताव्याधः कैलासमासवान् ५४ व्याधाश्रमःपुण्यतमःपवित्रःपाप
४५ नाशनः दिव्यंविमानमारुह्यदिव्यस्त्रीगणसेवितः ५५ व्याधः कैलासम १२
गमत्किंततोऽधिकमुच्यते स्वर्गमोक्षप्रदंराजन्गोकर्णंनात्रसंशयः ५६ त
दाश्रित्यपुराःसर्वेसिद्धाःसिद्धिमुपागताः नतस्यमहिमाशक्योवक्तुंवर्षशतै
रपि ५७ पाषाणंगृह्यतत्रस्थंयेयजंतिकुरूद्वह तेरुद्रलोकंगच्छंतिकिमु-
लिंगार्चनान्नृप ५८ सूतउवाच संवर्तकोपिविप्रेंद्रोनारदान्मुनिपुंगवात्
श्रुत्वागोकर्णमाहात्म्यंतीर्थेस्नात्वास्वयंकृतम् ५९ तल्लिंगंपूजयित्वातुनार
दात्सिद्धिमासवान् तपस्तप्त्वातुसुचिरंयथाकाममुवासह ६० सूतउवाच
वैवस्वतमनोःकालेद्वापरेमुनिपुंगव मथुरायांद्विजवरोह्यत्रिगोत्रसमुद्भ
वः ६१ अलिजंघइतिख्यातोह्यासीद्वेदविवर्जितः तस्यासीज्जारिणी
र्यासदानिष्ठुरभाषिणी ६२ नाम्ना[illegible]मंगलतिकापतिभक्तिविवर्जिता
जंघोपिदुर्मेधानित्यंदुर्जनसंगतः ६३ पानासक्तोद्यूतकारीपरस्त्री
देवब्राह्मणविद्वेषीपितृभक्तिविवर्जितः ६४ असंख्यातानिपापा

स्सदिनेदिने तथैवतस्यपत्नीचस्वधर्मपरिव
निचकारचदिनेदिने एवंदिनेषुगच्छत्सुकेषुचिद्विजदंप
शादेवजग्मतुःक्षेत्रमुत्तमम् तुलासंस्थेदिनकरेकार्तिकेमासे
द्वयस्तत्रजग्मुस्तेयात्रार्थंभरतर्षभ यात्राव्याजेनतौचापितैःस
नृप ६८ तत्रस्नात्वाचकावेर्यांमुषःकालेसमाहितौ तत्रस्थित्वाम
छद्मनाधनकांक्षया ६९ रंगनाथंचसंपूज्यश्रुत्वाहरिकथांनिशि म
देवताद्रव्यंमुषित्वाप्रययौद्विजः ७० पत्न्यासहैवशनकैर्मार्गमध्येगत
जः चारामार्गयितुंजग्मुरंगक्षेत्राद्रुतंभटाः ७१ ददृशुर्मार्गमध्येतंसदेव
द्रव्यकंद्विजम् लब्ध्वाराजांतिकंदूतानिन्युस्तंवैद्विजाधमम् ७२ राजा
नमूचुस्तेदूताश्चोरोऽयंब्राह्मणाधमः दृष्ट्वातौदंपतीराजातयोःशिक्षाम
कारयत् ७३ ततस्तेनैवदुःखेनपीडितौद्विजदंपती किंचित्कालांतरेराज
स्तत्रैवमरणंगतौ ७४ ततोयमभटाबध्वानिन्युर्वैवस्वतंपुरम् यमस्त्वयो
र्विचार्याथकृतंकर्मशुभाशुभम् ७५ दूतानाज्ञापयामासनरकेपात्यता-

त्विमौ ततोयमाज्ञयादूतापेतुस्तेनरकाग्निषु ७६ पश्चात्सानंगलेखातु
४६ बभूवनकुलीद्विज अलिजंघश्चभषकःसंजातःपुण्यलेशतः ७७ गोकर्णे
मृगुशार्दूलव्याजेनोर्जव्रतादिकान् जातिस्मरत्वंसंप्राप्यगोकर्णेसुचिरंस्थि
तौ ७८ ततःकर्मवशादेवसंवर्तस्याश्रमेशुभे गोकर्णक्षेत्रमाहात्म्यंनारदे
नप्रभाषितम् ७९ संवर्तकेनराजेंद्रसर्वताभ्यांश्रुतंतदा तस्माद्वियोनिजा
दुःखाद्विमुक्तौतौबभूवतुः ८० देवलोकात्ततोदूताःपाकशासनशासनात् दि
व्यंविमानमादायतयोर्निकटमाययुः ८१ ताभ्यांदत्वाकुरुश्रेष्ठदिव्यंदे
भास्वरम् विमानवरमारोप्यगोकर्णान्निर्ययुर्दिवम् ८२ देवैःसाकंदे
भुक्त्वाभोगाननेकशः उवाससुचिरंकालंपत्न्यासाकंद्विजोत्तमः ८
पुण्यावशेषेणपुनर्भूलोकमागतौ अंगदेशाधिपःसोभूत्कनकांग
८४ तत्पत्नीचापिसंजातागौराष्ट्राधिपतेःसुता नाम्नाकला
वकनकांगदम् ८५ पतिमापचार्वंगीमुदापरमयायुता
पालःप्राप्यपत्नींकलावतीम् ८६ राज्यंचकार